# ॥ નારદપરિવ્રાજકોપનિષત્ ॥

.. Narad-Parivrajaka Upanishad ..

sanskritdocuments.org

August 20, 2017

# .. Narad-Parivrajaka Upanishad ..

# ॥ નારદપરિવ્રાજકોપનિષત્ ॥

## Sanskrit Document Information

Text title : Narada-Parivrajaka Upanishad

File name : naradparivra.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic Tradition

Language : Sanskrit

Subject : philosophy/hinduism

Transliterated by : Sunder Hattangadi (sunderh at hotmail.com)

Proofread by : Sunder Hattangadi (sunderh at hotmail.com)

Description-comments : 43 / 108; Atharva Veda - Sanyasa upanishad

Latest update : Feb. 27, 2000

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ નારદપરિવ્રાજકોપનિષત્ ॥

પારિવ્રાજ્યધર્મપૂગાલઙ્કારા યત્પ્રબોધતઃ ।
દશપ્રણવલક્ષ્યાર્થં યાન્તિ તં રામમાશ્રયે ॥

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવાઃ ॥

ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ॥

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ ॥

વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ॥

સ્વસ્તિ નઃ પૂષા વિશ્વદેવાઃ ॥

સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ॥

સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

પરિવ્રાટ્ત્રિશિખી સીતાચૂડાનિર્વાણમણ્ડલમ્
દક્ષિણા શરભં સ્કન્દં મહાનારાયણાદ્વયમ્ ॥

અથ કદાચિત્પરિવ્રાજકાભરણો નારદઃ સર્વલોકસંચારં
કુર્વન્નપૂર્વપુણ્યસ્થલાનિ પુણ્યતીર્થાનિ તીર્થીકુર્વન્નવલોક્ય
ચિત્તશુદ્ધિં પ્રાપ્ય નિર્વૈરઃ શાન્તો દાન્તઃ સર્વતો
નિર્વેદમાસાદ્ય સ્વરૂપાનુસન્ધાનમનુસન્ધય
નિયમાનન્દવિશેષગણ્યં મુનિજનૈરુપસંકીર્ણં
નૈમિષારણ્યં પુણ્યસ્થલમવલોક્ય સરિગમપધનિસ-
સંજ્ઞૈર્વૈરાગ્યબોધકરૈઃ સ્વરવિશેષૈઃ પ્રાપઞ્ચિક-
પરાઙ્મુખાઇર્હરિકથાલાપૈઃ સ્થાવરજઙ્ગમનામકૈ-
ર્ભગવદ્ભક્તિવિશેષાઇર્નરમૃગકિંપુરુષામરકિંનર-
અપ્સરોગણાન્સંમોહયન્નાગતં બ્રહ્માત્મજં ભગવદ્ભક્તં
નારદમવલોક્ય દ્વાદશવર્ષસત્રયાગોપસ્થિતાઃ
શ્રુતાધ્યયનસમ્પન્નાઃ સર્વજ્ઞાસ્તપોનિષ્ઠાપરાશ્ચ
જ્ઞાનવૈરાગ્યસમ્પન્નાઃ શૌનકાદિમહર્ષયઃ

પ્રત્યુત્થાનં કૃત્વા નત્વા યથોચિતાતિથ્યપૂર્વકમુપવેશયિત્વા
સ્વયં સર્વેઽપ્યુપવિષ્ટા ભો ભગવન્બ્રહ્મપુત્ર કથં
મુક્ત્યુપાયોઽસ્માકં વક્તવ્ય ઇત્યુક્તસ્તાન્સ હોવાચ નારદઃ
સત્કુલભવોપનીતઃ સમ્યગુપનયનપૂર્વકં ચતુશ્ચત્વારિંશત્-
સંસ્કારસમ્પન્નઃ સ્વાભિમતૈકગુરુસમીપે સ્વશાખાધ્યયન-
પૂર્વકં સર્વવિદ્યાભ્યાસં કૃત્વા દ્વાદશવર્ષશુશ્રૂષા-
પૂર્વકં બ્રહ્મચર્યં પઞ્ચવિંશતિવત્સરં ગાર્હસ્થ્યં
પઞ્ચવિંશતિવત્સરં વાનપ્રસ્થાશ્રમં તદ્વિધિવત્ક્રમાન્નિર્વર્ત્ય
ચતુર્વિધબ્રહ્મચર્યં ષડ્વિધં ગાર્હસ્થ્યં ચતુર્વિધં
વાનપ્રસ્થધર્મં સમ્યગભ્યસ્ય તદુચિતં કર્મ સર્વં નિર્વર્ત્ય
સાધનચતુષ્ટયસમ્પન્નઃ સર્વસંસારોપરિ મનોવાક્કાય-
કર્મભિર્યથાશાનિવૃત્તસ્તથા વાસનૈષણોપર્યપિ નિર્વૈરઃ
શાન્તો દાન્તઃ સંન્યાસી પરમહંસાશ્રમેણાસ્ખલિતસ્વસ્વરૂપ-
ધ્યાનેન દેહત્યાગં કરોતિ સ મુક્તો ભવતિ સ મુક્તો ભવતીત્યુપનિષત્ ॥

ઇતિ પ્રથમોપદેશઃ ॥ ૧॥

અથ હૈનં ભગવન્તં નારદં સર્વે શૌનકાદયઃ
પપ્રચ્છુર્ભો ભગવન્સંન્યાસવિધિં નો બ્રૂહીતિ
તાનવલોક્ય નારદસ્તત્સ્વરૂપં સર્વં પિતામહમુખેનૈવ
જ્ઞાતુમુચિતમિત્યુક્ત્વા સત્રયાગપૂર્ત્યનન્તરં તૈઃ સહ
સત્યલોકં ગત્વા વિધિવદ્બ્રહ્મનિષ્ઠાપરં પરમેષ્ઠિનં
નત્વા સ્તુત્વા યથોચિતં તદાજ્ઞયા તૈઃ સહોપવિશ્ય
નારદઃ પિતામહમુવાચ ગુરુસ્ત્વં જનકસ્ત્વં સર્વવિદ્યા-
રહસજ્ઞઃ સર્વજ્ઞસ્ત્વમતો મત્તો મદિષ્ટં રહસ્યમેકં
વક્તવ્યં ત્વદ્વિના મદભિમતરહસ્યં વક્તું કઃ સમર્થઃ ।
કિમિતિચેત્પારિવ્રાજ્યસ્વરૂપક્રમં નો બ્રૂહીતિ નારદેન
પ્રાર્થિતઃ પરમેષ્ઠિ સર્વતઃ સર્વાનવલોક્ય મુહૂર્તમાત્રં
સમાધિનિષ્ઠો ભૂત્વા સંસારાતિનિવૃત્ત્યન્વેષણ ઇતિ
નિશ્ચિત્ય નારદમવલોક્ય તમાહ પિતામહઃ ।
પુરા મત્પુત્ર પુરુષસૂક્તોપનિષદ્રહસ્યપ્રકારં
નિરતિશયાકારાવલમ્બિના વિરાટ્પુરુષેણોપદિષ્ટં રહસ્યં

તે વિવિચ્યોચ્યતે તત્ક્રમમતિરહસ્યં બાઢમવહિતો ભૂત્વા
શ્રૂયતાં ભો નારદ વિધિવદાદાવનુપનીતોપનયાનન્તરં
તત્સત્કુલપ્રસૂતઃ પિતૃમાતૃવિધેયઃ પિતૃસમીપાદન્યત્ર
સત્સમ્પ્રદાયસ્થં શ્રદ્ધાવન્તં સત્કુલભવં શ્રોત્રિયં
શાસ્ત્રવાત્સલ્યં ગુણવન્તમકુટિલં સદ્ગુરુમાસાદ્ય નત્વા
યથોપયોગશુશ્રૂષાપૂર્વકં સ્વાભિમતં વિજ્ઞાપ્ય
દ્વાદશવર્ષસેવાપુરઃસરં સર્વવિદ્યાભ્યાસં કૃત્વા
તદનુજ્ઞયા સ્વકુલાનુરૂપામભિમતકન્યાં વિવાહ્ય
પઞ્ચવિંશતિવત્સરં ગુરુકુલવાસં કૃત્વાથ ગુર્વનુજ્ઞયા
ગૃહસ્થોચિતકર્મ કુર્વન્દૌર્બ્રાહ્મણ્યનિવૃત્તિમેત્ય
સ્વવંશવૃદ્ધિકામઃ પુત્રમેકમાસાદ્ય ગાર્હસ્થ્યોચિત-
પઞ્ચવિંશતિવત્સરં તીર્ત્વા તતઃ પઞ્ચચિંશતિવત્સરપર્યન્તં
ત્રિષવણમુદકસ્પર્શનપૂર્વકં ચતુર્થકાલમેકવારમાહાર-
માહરન્નયમેક એવ વનસ્થો ભૂત્વા પુરગ્રામપ્રાક્તનસઞ્ચારં
વિહાય નિકારવિરહિતતદાશ્રિતકર્મોચિતકૃત્યં નિર્વર્ત્ય
દૃષ્ટશ્રવણવિષયવૈતૃષ્ણ્યમેત્ય ચત્વારિંશત્સંકાર-
સમ્પન્નઃ સર્વતો વિરક્તશ્ચિત્તશુદ્ધિમેત્યાશાસૂયેર્ષ્યાહઙ્કારં
દગ્ધ્વા સાધનચતુષ્ટયસમ્પન્નઃ સંન્યસ્તુમર્હતીત્યુપનિષત્ ॥

ઇતિ દ્વિતીયોપદેશઃ ॥ ૨॥

અથ હૈનં નારદઃ પિતામહં પપ્રચ્છ ભગવન્કેન
સંન્યાસાધિકારી વેત્યેવમાદૌ સંન્યાસાધિકારિણં
નિરૂપ્ય પશ્ચાત્સંન્યાસવિધિરુચ્યતે અવહિતઃ શૃણુ ।
અથ ષણ્ડઃ પતિતોઽઙ્ગવિકલઃ સ્ત્રૈણો બધિરોઽર્ભકો
મૂકઃ પાષણ્ડશ્ચક્રી લિઙ્ગી વૈખાનસહરદ્વિજૌ
ભૃતકાધ્યાપકઃ શિપિવિષ્ટોઽનગ્નિકો વૈરાગ્યવન્તોઽપ્યેતે
ન સંન્યાસાર્હાઃ સંન્યસ્તા યદ્યપિ મહાવાક્યોપદેશેન
અધિકારિણઃ પૂર્વસંન્યાસી પરમહંસાધિકારી ॥ –
પરેણૈવાત્મનશ્ચાપિ પરસ્યૈવાત્મના તથા ।
અભયં સમવાપ્નોતિ સ પરિવ્રાડિતિ સ્મૃતિઃ ॥ ૧॥

ષણ્ડોઽથ વિકલોઽપ્યન્ધો બાલકશ્ચાપિ પાતકી ।

પતિતશ્ચ પરદ્વારી વૈખાનસહરદ્વિજૌ ॥ ૨॥

ચક્રી લિઙ્ગી ચ પાષણ્ડી શિપિવિષ્ટોઽપ્યનગ્નિકઃ ।
દ્વિત્રિવારેણ સંન્યસ્તો ભૃતકાધ્યાપકોઽપિ ચ ।
એતે નાર્હન્તિ સંન્યાસમાતુરેણ વિના ક્રમમ્ ॥ ૩॥

આતુરકાલઃ કથમાર્યસંમતઃ ॥ –
પ્રાણસ્યોત્ક્રમણાસન્નકાલસ્ત્વાતુરસંજ્ઞકઃ ।
નેતરસ્ત્વાતુરઃ કાલો મુક્તિમાર્ગપ્રવર્તકઃ ॥ ૪॥

આતુરેઽપિ ચ સંન્યાસે તત્તન્મન્ત્રપુરઃસરમ્ ।
મન્ત્રાવૃત્તિં ચ કૃત્વૈવ સંન્યસેદ્વિધિવદ્બુધઃ ॥ ૫॥

આતુરેઽપિ ક્રમે વાપિ પ્રૈષભેદો ન કુત્રચિત્ ।
ન મન્ત્રં કર્મરહિતં કર્મ મન્ત્રમપેક્ષતે ॥ ૬॥

અકર્મ મન્ત્રરહિતં નાતો મન્ત્રં પરિત્યજેત્ ।
મન્ત્રં વિના કર્મ કુર્યાદ્ભસ્મન્યાહુતિવદ્ભવેત્ ॥ ૭॥

વિધ્યુક્તકર્મસંક્ષેપાત્સંન્યાસસ્ત્વાતુરઃ સ્મૃતઃ ।
તસ્માદાતુરસંન્યાસે મન્ત્રાવૃત્તિવિધિર્મુને ॥ ૮॥

આહિતાગ્નિર્વિરક્તશ્ચેદ્દેશાન્તરગતો યદિ ।
પ્રાજાપત્યેષ્ટિમપ્સ્વેવ નિર્વૃત્યૈવાથ સંન્યસેત્ ॥ ૯॥

મનસા વાથ વિધ્યુક્તમન્ત્રાવૃત્ત્યાથવા જલે ।
શ્રુત્યનુષ્ઠાનમાર્ગેણ કર્માનુષ્ઠાનમેવ વા ॥ ૧૦॥

સમાપ્ય સંન્યસેદ્વિદ્વાન્નો ચેત્પાતિત્યમાપ્નુયાત્ ॥ ૧૧॥

યદા મનસિ સઞ્જાતં વૈતૃષ્ણ્યં સર્વવસ્તુષુ ।
તદા સંન્યાસમિચ્છેત પતિતઃ સ્યાદ્વિપર્યયે ॥ ૧૨॥

વિરક્તઃ પ્રવ્રજેદ્ધીમાન્સરક્તસ્તુ ગૃહે વસેત્ ।
સરાગો નરકં યાતિ પ્રવ્રજન્હિ દ્વિજાધમઃ ॥ ૧૩॥

યસ્યૈતાનિ સુગુપ્તાનિ જિહ્વોપસ્થોદરં કરઃ ।
સંન્યસેદકૃતોદ્વાહો બ્રાહ્મણો બ્રહ્મચર્યવાન્ ॥ ૧૪॥

સંસારમેવ નિઃસારં દૃષ્ટ્વા સારદિદૃક્ષયા ।

પ્રવ્રજન્ત્યકૃતોદ્વાહાઃ પરં વૈરાગ્યમાશ્રિતાઃ ॥ ૧૫॥

પ્રવૃત્તિલક્ષણં કર્મ જ્ઞાનં સંન્યાસલક્ષણમ્ ।
તસ્માજ્જ્ઞાનં પુરસ્કૃત્ય સંન્યસેદિહ બુદ્ધિવાન્ ॥ ૧૬॥

યદા તુ વિદિતં તત્ત્વં પરં બ્રહ્મ સનાતનમ્ ।
તદૈકદણ્ડં સંગૃહ્ય સોપવીતાં શિખાં ત્યજેત્ ॥ ૧૭॥

પરમાત્મનિ યો રક્તો વિરક્તોઽપરમાત્મનિ ।
સર્વૈષણાવિનિર્મુક્તઃ સ ભૈક્ષં ભોક્તુમર્હતિ ॥ ૧૮॥

પૂજિતો વન્દિતશ્ચૈવ સુપ્રસન્નો યથા ભવેત્ ।
તથા ચેત્તાડ્યમાનસ્તુ તદા ભવતિ ભૈક્ષભુક્ ॥ ૧૯॥

અહમેવાક્ષરં બ્રહ્મ વાસુદેવાખ્યમદ્વયમ્ ।
ઇતિ ભાવો ધ્રુવો યસ્ય તદા ભવતિ ભૈક્ષભુક્ ॥ ૨૦॥

યસ્મિઞ્શાન્તિઃ શમઃ શૌચં સત્યં સન્તોષ આર્જવમ્ ।
અકિઞ્ચનમદમ્ભશ્ચ સ કૈવલ્યાશ્રમે વસેત્ ॥ ૨૧॥

યદા ન કુરુતે ભાવં સર્વભૂતેષુ પાપકમ્ ।
કર્મણા મનસા વાચા તદા ભવતિ ભૈક્ષભુક્ ॥ ૨૨॥

દશલક્ષણકં ધર્મમનુતિષ્ઠન્સમાહિતઃ ।
વેદાન્તાન્વિધિવચ્છ્રુત્વા સંન્યસ્તેદનૃણો દ્વિજઃ ॥ ૨૩॥

ધૃતિઃ ક્ષમા દમોઽસ્તેયં શૌચમિન્દ્રિયનિગ્રહઃ ।
ધીર્વિદ્યા સત્યમક્રોધો દશકં ધર્મલક્ષણમ્ ॥ ૨૪॥

અતીતાન્ન સ્મરેદ્ભોગાન્ન તથાનાગતાનપિ ।
પ્રાપ્તાંશ્ચ નાભિનન્દેદ્યઃ સ કૈવલ્યાશ્રમે વસેત્ ॥ ૨૫॥

અન્તસ્થાનીન્દ્રિયાણ્યન્તર્બહિષ્ઠાન્વિષયાન્બહિઃ ।
શક્નોતિ યઃ સદા કર્તું સ કૈવલ્યાશ્રમે વસેત્ ॥ ૨૬॥

પ્રાણે ગતે યથા દેહઃ સુખં દુઃખં ન વિન્દતિ ।
તથા ચેત્પ્રાણયુક્તોઽપિ સ કૈવલ્યાશ્રમે વસેત્ ॥ ૨૭॥

કૌપીનયુગલં કન્થા દણ્ડ એકઃ પરિગ્રહઃ ।
યતેઃ પરમહંસસ્ય નાધિકં તુ વિધીયતે ॥ ૨૮॥

યદિ વા કુરુતે રાગાદધિકસ્ય પરિગ્રહમ્ ।
રૌરવં નરકં ગત્વા તિર્યગ્યોનિષુ જાયતે ॥ ૨૯॥

વિશીર્ણાન્યમલાન્યેવ ચેલાનિ ગ્રથિતાનિ તુ ।
કૃત્વા કન્થાં બહિર્વાસો ધારયેદ્ધાતુરઞ્જિતમ્ ॥ ૩૦॥

એકવાસા અવાસા વા એકદૃષ્ટિરલોલુપઃ ।
એક એવ ચરેન્નિત્યં વર્ષાસ્વેકત્ર સંવસેત્ ॥ ૩૧॥

કુટુમ્બં પુત્રદારાંશ્ચ વેદાઙ્ગાનિ ચ સર્વશઃ ।
યજ્ઞં યજ્ઞોપવીતં ચ ત્યક્ત્વા ગૂઢશ્ચરીદ્યતિઃ ॥ ૩૨॥

કામઃ ક્રોધસ્તથા દર્પો લોભમોહાદયશ્ચ યે ।
તાંસ્તુ દોષાન્પરિત્યજ્ય પરિવ્રાણ્નિર્મમો ભવેત્ ॥ ૩૩॥

રાગદ્વેષવિયુક્તાત્મા સમલોષ્ટાશ્મકાઞ્ચનઃ ।
પ્રાણિહિંસાનિવૃત્તશ્ચ મુનિઃ સ્યાત્સર્વનિઃસ્પૃહઃ ॥ ૩૪॥

દમ્ભાહઙ્કારનિર્મુક્તો હિંસાપૈશૂન્યવર્જિતઃ ।
આત્મજ્ઞાનગુણોપેતો યતિર્મોક્ષમવાપ્નુયાત્ ॥ ૩૫॥

ઇન્દ્રિયાણાં પ્રસઙ્ગેન દોષમૃચ્છત્યસંશયઃ ।
સંનિયમ્ય તુ તાન્યેવ તતઃ સિદ્ધિં નિગચ્છતિ ॥ ૩૬॥

ન જાતુ કામઃ કામાનામુપભોગેન શામ્યતિ ।
હવિષા કૃષ્ણવર્ત્મેવ ભૂય એવાભિવર્ધતે ॥ ૩૭॥

શ્રુત્વા સ્પૃષ્ટ્વા ચ ભુક્ત્વા ચ દૃષ્ટ્વા ઘ્રાત્વા ચ યો નરઃ ।
ન હૃષ્યતિ ગ્લાયતિ વા સ વિજ્ઞેયો જિતેન્દ્રિયઃ ॥ ૩૮॥

યસ્ય વાઙ્મનસી શુદ્ધે સમ્યગ્ગુપ્તે ચ સર્વદા ।
સ વૈ સર્વમવાપ્નોતિ વેદાન્તોપગતં ફલમ્ ॥ ૩૯॥

સંમાનાદ્બ્રાહ્મણો નિત્યમુદ્વિજેત વિષાદિવ ।
અમૃતસ્યેવ ચાકાઙ્ક્ષેદવમાનસ્ય સર્વદા ॥ ૪૦॥

સુખં હ્યવમતઃ શેતે સુખં ચ પ્રતિબુધ્યતે ।
સુખં ચરતિ લોકેઽસ્મિન્નવમન્તા વિનશ્યતિ ॥ ૪૧॥

અતિવાદાંસ્તિતિક્ષેત નાવમન્યેત કઞ્ચન ।
ન ચેમં દેહમાશ્રિત્ય વૈરં કુર્વીત કેનચિત્ ॥ ૪૨॥

ક્રુધ્યન્તં ન પ્રતિક્રુધ્યેદાક્રુષ્ટઃ કુશલં વદેત્ ।
સપ્તદ્વારાવકીર્ણાં ચ ન વાચમનૃતાં વદેત્ ॥ ૪૩॥

અધ્યાત્મરતિરાસીનો નિરપેક્ષો નિરાશિષઃ ।
આત્મનૈવ સહાયેન સુખાર્થી વિચરેદિહ ॥ ૪૪॥

ઇન્દ્રિયાણાં નિરોધેન રાગદ્વેષક્ષયેણ ચ ।
અહિંસયા ચ ભૂતાનામમૃતત્વાય કલ્પતે ॥ ૪૫॥

અસ્થિસ્થૂણં સ્નાયુબદ્ધં માંસશોણિતલેપિતમ્ ।
ચર્માવબદ્ધં દુર્ગન્ધિ પૂર્ણં મૂત્રપુરીષયોઃ ॥ ૪૬॥

જરાશોકસમાવિષ્ટં રોગાયતનમાતુરમ્ ।
રજસ્વલમનિત્યં ચ ભૂતાવાસૈમં ત્યજેત્ ॥ ૪૭॥

માંસાસૃક્પૂયવિણ્મૂત્રસ્નાયુમજ્જાસ્થિસંહતૌ ।
દેહે ચેત્પ્રીતિમાન્મૂઢો ભવિતા નરકેઽપિ સઃ ॥ ૪૮॥

સા કાલપુત્રપદવી સા માહાવીચિવાગુરા ।
સાસિપત્રવનશ્રેણી યા દેહેઽહમિતિ સ્થિતિઃ ॥ ૪૯॥

સા ત્યાજ્યા સર્વયત્નેન સર્વનાશેઽપ્યુપસ્થિતે ।
સ્પ્રષ્ટવ્યા સા ન ભવ્યેન સશ્વમાંસેવ પુલ્કસી ॥ ૫૦॥

પ્રિયેષુ સ્વેષુ સુકૃતમપ્રિયેષુ ચ દુષ્કૃતમ્ ।
વિસૃજ્ય ધ્યાનયોગેન બ્રહ્માપ્યેતિ સનાતનમ્ ॥ ૫૧॥

અનેન વિધિના સર્વાંસ્ત્યક્ત્વા સઙ્ગાઞ્શનૈઃ શનૈઃ ।
સર્વદ્વન્દ્વૈર્વિનિર્મુક્તો બ્રહ્મણ્યેવાવતિષ્ઠતે ॥ ૫૨॥

એક એવ ચરેન્નિત્યં સિદ્ધ્યર્થમસહાયકઃ ।
સિદ્ધિમેકસ્ય પશ્યન્હિ ન જહાતિ ન હીયતે ॥ ૫૩॥

કપાલં વૃક્ષમૂલાનિ કુચેલાન્યસહાયતા ।
સમતા ચૈવ સર્વસ્મિન્નૈતન્મુક્તસ્ય લક્ષણમ્ ॥ ૫૪॥

સર્વભૂતહિતઃ શાન્તસ્ત્રિદણ્ડી સકમણ્ડલુઃ ।

એકારામઃ પરિવ્રજ્ય ભિક્ષાર્થં ગ્રામમાવિશેત્ ॥ ૫૫॥

એકો ભિક્ષુર્યથોક્તઃ સ્યાદ્વાવેવ મિથુનં સ્મૃતમ્ ।
ત્રયો ગ્રામઃ સમાખ્યાત ઊર્ધ્વં તુ નગરાયતે ॥ ૫૬॥

નગરં ન હિ કર્તવ્યં ગ્રામો વા મિથુનં તથા ।
એતત્ત્રયં પ્રકુર્વાણઃ સ્વધર્માચ્ચ્યવતે યતિઃ ॥ ૫૭॥

રાજવાર્તાદિતેષાં સ્યાદ્ભિક્ષાવાર્તા પરસ્પરમ્ ।
સ્નેહપૈશૂન્યમાત્સર્યં સંનિકર્ષાન્ન સંશયઃ ॥ ૫૮॥

એકાકી નિઃસ્પૃહસ્તિષ્ઠેન હિ કેન સહાલપેત્ ।
દદ્યાન્નારાયણેત્યેવ પ્રતિવાક્યં સદા યતિઃ ॥ ૫૯॥

એકાકી ચિન્તયેદ્બ્રહ્મ મનોવાક્કાયકર્મભિઃ ।
મૃત્યું ચ નાભિનન્દેત જીવિતં વા કથંચન ॥ ૬૦॥

કાલમેવ પ્રતીક્ષેત યાવદાયુઃ સમાપ્યતે ।
નાભિનન્દેત મરણં નાભિનન્દેત જીવિતમ્ ॥ ૬૧॥

અજિહ્વઃ ષણ્ડકઃ પઙ્ગુરન્ધો બધિર એવ ચ ।
મુગ્ધશ્ચ મુચ્યતે ભિક્ષુઃ ષડ્ભિરેતૈર્ન સંશયઃ ॥ ૬૨॥

ઇદમિષ્ટમિદં નેતિ યોઽશ્નન્નપિ ન સજ્જતિ ।
હિતં સત્યં મિતં વક્તિ તમજિહ્વં પ્રચક્ષતે ॥ ૬૩॥

અદ્યજાતાં યથા નારીં તથા ષોડશવાર્ષિકીમ્ ।
શતવર્ષં ચ યો દૃષ્ટ્વા નિર્વિકારઃ સ ષણ્ડકઃ ॥ ૬૪॥

ભિક્ષાર્થમટનં યસ્ય વિણ્મૂત્રકરણાય ચ ।
યોજનાન્ન પરં યાતિ સર્વથા પઙ્ગુરેવ સઃ ॥ ૬૫॥

તિષ્ઠતો વ્રજતો વાપિ યસ્ય ચક્ષુર્ન દૂરગમ્ ।
ચતુર્યુગાં ભુવં મુક્ત્વા પરિવ્રાટ્ સોઽન્ધ ઉચ્યતે ॥ ૬૬॥

હિતાહિતં મનોરામં વચઃ શોકાવહં તુ યત્ ।
શ્રુત્વાપિ ન શૃણોતીવ બધિરઃ સ પ્રકીર્તિતઃ ॥ ૬૭॥

સાન્નિધ્યે વિષયાણાં યઃ સમર્થો વિકલેન્દ્રિયઃ ।
સુપ્તવદ્વર્તતે નિત્યં સ ભિક્ષુર્મુગ્ધ ઉચ્યતે ॥ ૬૮॥

નટાદિપ્રેક્ષણં દ્યૂતં પ્રમદાસુહૃદં તથા ।
ભક્ષ્યં ભોજ્યમુદક્યાં ચ ષણ્ન પશ્યેત્કદાચન ॥ ૬૯॥

રાગં દ્વેષં મદં માયાં દ્રોહં મોહં પરાત્મસુ ।
ષડેતાનિ યતિર્નિત્યં મનસાપિ ન ચિન્તયેત્ ॥ ૭૦॥

મઞ્ચકં શુક્લવસ્ત્રં ચ સ્ત્રીકથાલૌલ્યમેવ ચ ।
દિવા સ્વાપં ચ યાનં ચ યતીનાં પાતકાનિ ષટ્ ॥ ૭૧॥

દૂરયાત્રાં પ્રયત્નેન વર્જયેદાત્મચિન્તકઃ ।
સદોપનિષદં વિદ્યામભ્યસેન્મુક્તિહૈતુકીમ્ ॥ ૭૨॥

ન તીર્થસેવી નિત્યં સ્યાન્નોપવાસપરો યતિઃ ।
ન ચાધ્યયનશીલઃ સ્યાન્ન વ્યાખ્યાનપરો ભવેત્ ॥ ૭૩॥

અપાપમશઠં વૃત્તમજિહ્મં નિત્યમાચરેત્ ।
ઇન્દ્રિયાણિ સમાહૃત્ય કૂર્મોઽઙ્ગાનીવ સર્વશઃ ॥ ૭૪॥

ક્ષીણેન્દ્રિયમનોવૃત્તિર્નિરાશીર્નિષ્પરિગ્રહઃ ।
નિર્દ્વન્દ્વો નિર્નમસ્કારો નિઃસ્વધાકાર એવ ચ ॥ ૭૫॥

નિર્મમો નિરહઙ્કારો નિરપેક્ષો નિરાશિષઃ ।
વિવિક્તદેશસંસક્તો મુચ્યતે નાત્ર સંશય ઇતિ ॥ ૭૬॥

અપ્રમત્તઃ કર્મભક્તિજ્ઞાનસમ્પન્નઃ સ્વતન્ત્રો
વૈરાગ્યમેત્ય બ્રહ્મચારી ગૃહી વાનપ્રસ્થો વા
મુખ્યવૃત્તિકા ચેદ્બ્રહ્મચર્યં સમાપ્ય ગૃહી
ભવેદ્ગૃહાદ્વની ભૂત્વા પ્રવ્રજેદ્યદિવેતરથા
બ્રહ્મચર્યાદેવ પ્રવ્રજેદ્ગૃહાદ્વા વનાદ્વાથ
પુનરવ્રતી વા વ્રતી વા સ્નાતકો વાઽસ્નાતકો
વોત્સન્નાગ્નિરનગ્નિકો વા યદહરેવ વિરજેત્તદહરેવ
પ્રવ્રજેત્તદ્ધૈકે પ્રાજાપત્યામેવેષ્ટિં કુર્વન્ત્યથવા
ન કુર્યાદગ્નેય્યમેવ કુર્યાદગ્નિર્હિપ્રાણઃ પ્રાણમેવૈતયા
કરોતિ તસ્માત્ત્રૈધાતવીયામેવ કુર્યાદેતૈવ ત્રયો ધાતવો
યદુત સત્ત્વં રજસ્તમ ઇતિ ॥

અયં તે યોનિરૃત્વિયો યતો જાતો અરોચથાઃ ।
તં જાનન્નગ્ન આરોહાથાનો વર્ધયા રયિમિત્યનેન
મન્ત્રેણાગ્નિમાજિઘ્રેદેશ વા અગ્નેર્યોનિર્યઃ પ્રાણઃ
પ્રાણં ગચ્છ સ્વાં યોનિં ગચ્છ
સ્વાહેત્યેવમેવૈતદાહવનીયાદગ્નિમાહૃત્ય
પૂર્વવદગ્નિમાજિઘ્રેદ્યદગ્નિં ન વિન્દેદપ્સુ જુહુયાદાપો
વૈ સર્વા દેવતાઃ સર્વાભ્યો દેવતાભ્યો જુહોમિ સ્વાહેતિ
હુત્વોધૃત્ય તદુદકં પ્રાશ્નીયાત્સાજ્યં હવિરનામયં
મોદમિતિ શિખાં યજ્ઞોપવીતં પિતરં પુત્રં કલત્રં કર્મ
ચાધ્યયનં મન્ત્રાન્તરં વિસૃજ્યૈવ
પરિવ્રજત્યાત્મવિન્મોક્ષમન્ત્રૈસ્ત્રૈધાતવીયૈર્વિધેસ્તદ્બ્રહ્મ
તદુપાસિતવ્યમેવૈતદિતિ ॥

પિતામહં પુનઃ પપ્રચ્છ નારદઃ કથમયજ્ઞોપવીતી
બ્રાહ્મણ ઇતિ ॥ તમાહ પિતામહઃ ॥

સશિખં વપનં કૃત્વા બહિઃસૂત્રં ત્યજેદ્બુધઃ ।
યદક્ષરં પરં બ્રહ્મ તત્સૂત્રમિતિ ધારયેત્ ॥ ૭૭॥

સૂચનાત્સૂત્રમિત્યાહુઃ સૂત્રં નામ પરં પદમ્ ।
તત્સૂત્રં વિદિતં યેન સ વિપ્રો વેદપારગઃ ॥ ૭૮॥

યેન સર્વમિદં પ્રોતં સૂત્રે મણિગણા ઇવ ।
તત્સૂત્રં ધારયેદ્યોગી યોગવિત્તત્ત્વદર્શનઃ ॥ ૭૯॥

બહિઃસૂત્રં ત્યજેદ્વિદ્વાન્યોગમુત્તમમાસ્થિતઃ ।
બ્રહ્મભાવમિદં સૂત્રં ધારયેદ્યઃ સચેતનઃ ।
ધારણાત્તસ્ય સૂત્રસ્ય નોચ્છિષ્ટો નાશુચિર્ભવેત્ ॥ ૮૦॥

સૂત્રમન્તર્ગતં યેષાં જ્ઞાનયજ્ઞોપવીતિનામ્ ।
તે વૈ સૂત્રવિદો લોકે તે ચ યજ્ઞોપવીતિનઃ ॥ ૮૧॥

જ્ઞાનશિખિનો જ્ઞાનનિષ્ઠા જ્ઞાનયજ્ઞોપવીતિનઃ ।
જ્ઞાનમેવ પરં તેષાં પવિત્રં જ્ઞાનમુચ્યતે ॥ ૮૨॥

અગ્નેરિવ શિખા નાન્યા યસ્ય જ્ઞાનમયી શિખા ।

સ શિખીત્યુચ્યતે વિદ્વાન્નેતરે કેશધારિણઃ ॥ ૮૩॥

કર્મણ્યધિકૃતા યે તુ વૈદિકે બ્રાહ્મણાદયઃ ।
તેભિર્ધાર્યમિદં સૂત્રં ક્રિયાઙ્ગં તદ્ધિ વૈ સ્મૃતમ્ ॥ ૮૪॥

શિખા જ્ઞાનમયી યસ્ય ઉપવીતં ચ તન્મયમ્ ।
બ્રાહ્મણ્યં સકલં તસ્ય ઇતિ બ્રહ્મવિદો વિદુરિતિ ॥ ૮૫॥

તદેતદ્વિજ્ઞાય બ્રાહ્મણઃ પરિવ્રજ્ય પરિવ્રાડેકશાટી
મુણ્ડોઽપરિગ્રહઃ શરીરક્લેશાસહિષ્ણુશ્ચેદથવા
યથાવિધિશ્ચેજ્જાતરૂપધરો ભૂત્વા સપુત્રમિત્રકલત્રાપ્ત-
બન્ધ્વાદીનિ સ્વાધ્યાયં સર્વકર્માણિ સંન્યસ્યાયં
બ્રહ્માણ્ડં ચ સર્વં કૌપીનં દણ્ડમાચ્છાદનં
ચ ત્યક્ત્વા દ્વન્દ્વસહિષ્ણુર્ન શીતં ન ચોષ્ણં ન સુખં
ન દુઃખં ન નિદ્રા ન માનાવમાને ચ ષડૂર્મિવર્જિતો નિન્દાહઙ્કારમત્સરગર્વદમ્ભેર્ષ્યાસૂયેચ્છાદ્વેષ-
સુખદુઃખકામક્રોધલોભમોહાદીન્વિસૃજ્ય સ્વવપુઃ
શવાકારમિવ સ્મૃત્વા સ્વવ્યતિરિક્તં સર્વમન્તર્બહિરમન્યમાનઃ
કસ્યાપિ વન્દનમકૃત્વા ન નમસ્કારો ન સ્વાહાકારો
ન સ્વધાકારો ન નિન્દાસ્તુતિર્યાદૃચ્છિકો ભવેદ્યદૃચ્છા-
લાભસન્તુષ્ટઃ સુવર્ણાદીન્ન પરિગ્રહેન્નાવાહનં ન વિસર્જનં
ન મન્ત્રં નામન્ત્રં ન ધ્યાનં નોપાસનં ન લક્ષ્યં નાલક્ષ્યં
ન પૃથક્ નાપૃથક્ ન ત્વન્યત્ર સર્વત્રાનિકેતઃ સ્થિરમતિઃ શૂન્યાગારવૃક્ષમૂલદેવગૃહતૃણકૂટકુલાલશાલાગ્નિહોત્ર-
શાલાગ્નિદિગન્તરનદીતટપુલિનભૂગૃહકન્દરનિર્ઝરસ્થણ્ડિલેષુ વને વા શ્વેતકેતુઋભુનિદાઘઋષભદુર્વાસઃસંવર્તકદત્તાત્રેયરૈવતક-

વદવ્યક્તલિઙ્ગોઽવ્યક્તાચારો બાલોન્મત્તપિશાચવદનુન્મત્તોન્મત્ત-
વદાચરંસ્ત્રિદણ્ડં શિક્યં પાત્રં કમણ્ડલું કટિસૂત્રં ચ તત્સર્વં
ભૂઃસ્વાહેત્યપ્સુ પરિત્યજ્ય કટિસૂત્રં ચ કૌઓપીનં દણ્ડં વસ્ત્રં
કમણ્ડલું સર્વમપ્સુ વિસૃજ્યાથ જાતરૂપધરશ્ચરેદાત્માનમન્વિચ્છેદ્યથા
જાતરૂપધરો નિર્દ્વન્દ્વો નિષ્પરિગ્રહસ્તત્ત્વબ્રહ્મમાર્ગે સમ્યક્ સમ્પન્નઃ
શુદ્ધમાનસઃ પ્રાણસન્ધારણાર્થં યથોક્તકાલે કરપાત્રેણાન્યેન વા
યાચિતાહારમાહરન્ લાભલાભે સમો ભૂત્વા નિર્મમઃ
શુક્લધ્યાનપરાયણોઽધ્યાત્મનિષ્ઠઃ શુભાશુભકર્મનિર્મૂલનપરઃ
સંન્યસ્ય પૂર્ણાનન્દૈકબોધસ્તદ્બ્રહ્માહમસ્મીતિ

બ્રહ્મપ્રણવમનુસ્મરન્ભ્રમરકીટન્યાયેન શરીરત્રયમુત્સૃજ્ય
સંન્યાસેનૈવ દેહત્યાગં કરોતિ સ કૃતકૃત્યો ભવતીત્યુપનિષત્ ॥

ઇતિ તૃતીયોપદેશઃ ॥ ૩॥

ત્યક્ત્વા લોકાંશ્ચ વેદાંશ્ચ વિષયાનિન્દ્રિયાણિ ચ ।
આત્મન્યેવ સ્થિતો યસ્તુ સ યાતિ પરમાં ગતિમ્ ॥ ૧॥

નામગોત્રાદિવરણં દેશં કાલં શ્રુતં કુલમ્ ।
વયો વૃત્તં વ્રતં શીલં ખ્યાપયેન્નૈવ સદ્યતિઃ ॥ ૨॥

ન સમ્ભાષેત્સ્ત્રિયં કાઞ્ચિત્પૂર્વદૃષ્ટાં ચ ન સ્મરેત્ ।
કથાં ચ વર્જયેત્તાસાં ન પશ્યેલ્લિખિતામપિ ॥ ૩॥

એતચ્ચતુષ્ટયં મોહાત્સ્ત્રીણામાચરતો યતેઃ ।
ચિત્તં વિક્રિયતેઽવશ્યં તદ્વિકારાત્પ્રણશ્યતિ ॥ ૪॥

તૃષ્ણા ક્રોધોઽનૃતં માયા લોભમોહૌ પ્રિયાપ્રિયે ।
શિલ્પં વ્યાખ્યાનયોગશ્ચ કામો રાગપરિગ્રહઃ ॥ ૫॥

અહઙ્કારો મમત્વં ચ ચિકિત્સા ધર્મસાહસમ્ ।
પ્રાયશ્ચિત્તં પ્રવાસશ્ચ મન્ત્રૌષધગરાશિષઃ ॥ ૬॥

પ્રતિષિદ્ધાનિ ચૈતાનિ સેવમાનો વ્રજેદધઃ ।
આગચ્છ ગચ્છ તિષ્ઠેતિ સ્વાગતં સુહૃદોઽપિ વા ॥ ૭॥

સન્માનનં ચ ન બ્રૂયાન્મુનિર્મોક્ષપરાયણઃ ।
પ્રતિગ્રહં ન ગૃહ્ણીયાન્નૈવ ચાન્યં પ્રદાપયેત્ ॥ ૮॥

પ્રેરયેદ્વા તયા ભિક્ષુઃ સ્વપ્નેઽપિ ન કદાચન ।
જાયાભ્રાતૃસુતાદીનાં બન્ધૂનાં ચ શુભાશુભમ્ ॥ ૯॥

શ્રુત્વા દૃષ્ટ્વા ન કમ્પેત શોકહર્ષૌ ત્યજેદ્યતિઃ ।
અહિંસાસત્યમસ્તેયબ્રહ્મચર્યાપરિગ્રહઃ ॥ ૧૦॥

અનૌદ્ધત્ત્યમદીનત્વં પ્રસાદઃ સ્થૈર્યમાર્જવમ્ ।
અસ્નેહો ગુરુશુશ્રૂષા શ્રદ્ધા ક્ષાન્તિર્દમઃ શમઃ ॥ ૧૧॥

ઉપેક્ષા ધૈર્યમાધુર્યે તિતિક્ષા કરુણા તથા ।
હ્રીસ્તથા જ્ઞાનવિજ્ઞાને યોગો લઘ્વશનં ધૃતિઃ ॥ ૧૨॥

એષ સ્વધર્મો વિખ્યાતો યતીનાં નિયતાત્મનામ્ ।
નિર્દ્વન્દ્વો નિત્યસત્ત્વસ્થઃ સર્વત્ર સમદર્શનઃ ॥ ૧૩॥

તુરીયઃ પરમો હંસઃ સાક્ષાન્નારાયણો યતિઃ ।
એકરાત્રં વસેદ્ગ્રામે નગરે પઞ્ચરાત્રકમ્ ॥ ૧૪॥

વર્ષાભ્યોઽન્યત્ર વર્ષાસુ માસાંશ્ચ ચતુરો વસેત્ ।
દ્વિરાત્રં વા વસેદ્ગ્રામે ભિક્ષુર્યદિ વસેત્તદા ॥ ૧૫॥

રાગાદયઃ પ્રસજ્યેરંસ્તેનાસૌ નારકી ભવેત્ ।
ગ્રામાન્તે નિર્જને દેશે નિયતાત્માઽનિકેતનઃ ॥ ૧૬॥

પર્યટેત્કીટવદ્ભૂમૌ વર્ષાસ્વેકત્ર સંવસેત્ ।
એકવાસા અવાસા વા એકદૃષ્ટિરલોલુપઃ ॥ ૧૭॥

અદૂષયન્સતાં માર્ગં ધ્યાનયુક્તો મહીં ચરેત્ ।
શુચૌ દેશે સદા ભિક્ષુઃ સ્વધર્મમનુપાલયન્ ॥ ૧૮॥

પર્યટેત સદા યોગી વીક્ષયન્વસુધાતલમ્ ।
ન રાત્રૌ ન ચ મધ્યાહ્ને સન્ધ્યયોર્નૈવ પર્યટન્ ॥ ૧૯॥

ન શૂન્યે ન ચ દુર્ગે વા પ્રાણિબાધાકરે ન ચ ।
એકરાત્રં વસેદ્ગ્રામે પત્તને તુ દિનત્રયમ્ ॥ ૨૦॥

પુરે દિનદ્વયં ભિક્ષુર્નગરે પઞ્ચરાત્રકમ્ ।
વર્ષાસ્વેકત્ર તિષ્ઠેત સ્થાને પુણ્યજલાવૃતે ॥ ૨૧॥

આત્મવત્સર્વભૂતાનિ પશ્યન્ભિક્ષુશ્ચરેન્મહીમ્ ।
અન્ધવત્કુબ્જવચ્ચૈવ બધિરોન્મત્તમૂકવત્ ॥ ૨૨॥

સ્નાનં ત્રિષવણં પ્રોક્તં બહૂદકવનસ્થયોઃ ।
હંસે તુ સકૃદેવ સ્યાત્પરહંસે ન વિદ્યતે ॥ ૨૩॥

મૌનં યોગાસનં યોગસ્તિતિક્ષૈકાન્તશીલતા ।
નિઃસ્પૃહત્વં સમત્વં ચ સપ્તૈતાન્યૈકદણ્ડિનામ્ ॥ ૨૪॥

પરહંસાશ્રમસ્થો હિ સ્નાનાદેરવિધાનતઃ ।
અશેષચિત્તવૃત્તીનાં ત્યાગં કેવલમાચરેત્ ॥ ૨૫॥

ત્વઙ્માંસરુધિરસ્નાયુમજ્જામેદોસ્થિસંહતૌ ।
વિણ્મૂત્રપૂયે રમતાં ક્રિમીણાં કિયદન્તરમ્ ॥ ૨૬॥

ક્વ શરીરમશેષાણાં શ્લેષ્માદીનાં મહાચયઃ ।
ક્વ ચાઙ્ગશોભાસૌભાગ્યકમનીયાદયો ગુણાઃ ॥ ૨૭॥

માંસાસૃક્પૂયવિણ્મૂત્રસ્નાયુમજ્જાસ્થિસંહતૌ ।
દેહે ચેત્પ્રીતિમાન્મૂઢો ભવિતા નરકેઽપિ સઃ ॥ ૨૮॥

સ્ત્રીણામવાચ્યદેશસ્ય ક્લિન્નનાડીવ્રણસ્ય ચ ।
અભેદેઽપિ મનોભેદાજ્જનઃ પ્રાયેણ વઞ્ચ્યતે ॥ ૨૯॥

ચર્મખણ્ડં દ્વિધા ભિન્નમપાનોદ્ગારધૂપિતમ્ ।
યે રમન્તિ નમસ્તેભ્યઃ સાહસં કિમતઃ પરમ્ ॥ ૩૦॥

ન તસ્ય વિદ્યતે કાર્યં ન લિઙ્ગં વા વિપશ્ચિતઃ ।
નિર્મમો નિર્ભયઃ શાન્તો નિર્દ્વન્દ્વોઽવર્ણભોજનઃ ॥ ૩૧॥

મુનિઃ કૌપીનવાસાઃ સ્યાન્નગ્નો વા ધ્યાનતત્પરઃ ।
એવં જ્ઞાનપરો યોગી બ્રહ્મભૂયાય કલ્પતે ॥ ૩૨॥

લિઙ્ગે સત્યપિ ખલ્વસ્મિઞ્જ્ઞાનમેવ હિ કારણમ્ ।
નિર્મોક્ષાયેહ ભૂતાનાં લિઙ્ગગ્રામો નિરર્થકઃ ॥ ૩૩॥

યન્ન સન્તં ન ચાસન્તં નાશ્રુતં ન બહુશ્રુતમ્ ।
ન સુવૃત્તં ન દુર્વૃત્તં વેદ કશ્ચિત્સ બ્રાહ્મણઃ ॥ ૩૪॥

તસ્માદલિઙ્ગો ધર્મજ્ઞો બ્રહ્મવૃત્તમનુવ્રતમ્ ।
ગૂઢધર્માશ્રિતો વિદ્વાનજ્ઞાનચરિતં ચરેત્ ॥ ૩૫॥

સન્દિગ્ધઃ સર્વભૂતાનાં વર્ણાશ્રમવિવર્જિતઃ ।
અન્ધવજ્જડવચ્ચાપિ મૂકવચ્ચ મહીં ચરેત્ ॥ ૩૬॥

તં દૃષ્ટ્વા શાન્તમનસં સ્પૃહયન્તિ દિવૌકસઃ ।
લિઙ્ગાભાવાત્તુ કૈવલ્યમિતિ બ્રહ્માનુશાસનમિતિ ॥ ૩૭॥

અથ નારદઃ પિતામહં સંન્યાસવિધિં નો બ્રૂહીતિ પપ્રચ્છ ।
પિતામહસ્તથેત્યઙ્ગીકૃત્યાતુરે વા ક્રમે વાપિ
તુરીયાશ્રમસ્વીકારારાર્થં કૃચ્છ્રપ્રાયશ્ચિત્ત-

પૂર્વકમષ્ટશ્રાદ્ધં કુર્યાદ્દેવર્ષિદિવ્યમનુષ્ય-
ભૂતપિતૃમાત્રાત્મેત્યષ્ટશ્રાદ્ધાનિ કુર્યાત્ ।
પ્રથમં સત્યવસુસંજ્ઞકાન્વિશ્વાન્દેવાન્દેવશ્રાદ્ધે
બ્રહ્મવિષ્ણુમહેશ્વરાનૃષિશ્રાદ્ધે દેવર્ષિક્ષત્રિયર્ષિ-
મનુષ્યર્ષીન્ દિવ્યશ્રાદ્ધે વસુરુદ્રાદુત્યરૂપાન્મનુષ્યશ્રાદ્ધે સનકસનન્દનસનત્કુમારસનત્સુજાતાન્ભૂતશ્રાદ્ધે
માતૃપિતામહીપ્રપિતામહીરાત્મશ્રાદ્ધે
આત્મપિતૃપિતામહાઞ્જીવત્પિતૃકશ્ચેત્પિતરં ત્યક્ત્વા
આત્મપિતામહપ્રપિતામહાનિતિ સર્વત્ર યુગ્મક્લૃપ્ત્યા
બ્રાહ્મણાનર્ચયેદેકાધ્વરપક્ષેઽષ્ટાધ્વરપક્ષે વા સ્વશાખાનુગતમન્ત્રૈરષ્ટશ્રાદ્ધાન્યષ્ટદિનેષુ વા
એકદિને વા પિતૃયાગોક્તવિધાનેન બ્રાહ્મણાનભ્યર્ચ્ય
મુક્ત્યન્તં યથાવિધિ નિર્વર્ત્ય પિણ્ડપ્રદાનાનિ નિર્વર્ત્ય
દક્ષિણાતાંબૂલૈસ્તોષયિત્વા બ્રાહ્મણાન્પ્રેષયિત્વા
શેષકર્મસિદ્ધ્યર્થં સપ્તકેશાન્વિસૃજ્ય
–'શેષકર્મપ્રસિદ્ધ્યર્થં કેશાન્સપ્તાષ્ટ વા દ્વિજઃ ।
સંક્ષિપ્ય વાપયેત્પૂર્વં કેશશ્મશ્રુનખાનિ ચે'તિ
સપ્તકેશાન્સંરક્ષ્ય કક્ષોપસ્થવર્જં ક્ષૌરપૂર્વકં
સ્નાત્વા સાયંસન્ધ્યાવન્દનં નિર્વર્ત્ય સહસ્રગાયત્રીં
જપ્ત્વા બ્રહ્મયજ્ઞં નિર્વર્ત્ય સ્વાધીનાગ્નિમુપસ્થાપ્ય
સ્વશાખોપસંહરણં કૃત્વા તદુક્તપ્રકારેણાજ્યાહુતિ-
માજ્યભાગાન્તં હુત્વાહુતિવિધિ,ન્ સમાપ્યાત્માદિભિસ્ત્રિવારં
સક્તુપ્રાશનં કૃત્વાચમનપૂર્વકમગ્નિં સંરક્ષ્ય
સ્વયમગ્નેરુત્તરતઃ કૃષ્ણજિનોપરિ સ્થિત્વા પુરાણશ્રવણપૂર્વકં
જાગરણં કૃત્વા ચતુર્થયામાન્તે સ્નાત્વા તદગ્નૌ ચરું
શ્રપયિત્વા પુરુષસૂક્તેનાન્નસ્ય ષોડશાહુતિર્હુત્વા
વિરજાહોમં કૃત્વા અથાચમ્ય સદક્ષિણં વસ્ત્રં સુવર્ણપાત્રં
ધેનું દત્વા સમાપ્ય બ્રહ્મોદ્વાસનં કૃત્વા ।
સંમાસિઞ્ચન્તુ મરુતઃ સમિન્દ્રઃ સંબૃહસ્પતિઃ ।
સંમાયમગ્નિઃ સિઞ્ચત્વાયુષા ચ ધનેન ચ
બલેન ચાયુષ્મન્તઃ કરોતુ મેતિ ।
યા તે અગ્ને યજ્ઞિયા તનૂસ્તયેહ્યારોહાત્માત્માનમ્ ।
અચ્છા વસૂનિ કૃણ્વન્નસ્મે નર્યા પુરૂણિ ।

યજ્ઞો ભૂત્વા યજ્ઞમાસીદ સ્વાં યોનિં જાતવેદો ભુવ
આજાયમાનઃ સ ક્ષય એધીત્યનેનાગ્નિમાત્મન્યારોપ્ય
ધ્યાત્વાગ્નિં પ્રદક્ષિણનમસ્કારપૂર્વકમુદ્વાસ્ય
પ્રાતઃસન્ધ્યામુપાસ્ય સહસ્રગાયત્રીપૂર્વકં
સૂર્યોપસ્થાનં કૃત્વા નાભિદઘ્નોદકમુપવિશ્ય
અષ્ટદિક્પાલકાર્ઘ્યપૂર્વકં ગાયત્ર્યુદ્વાસનં
કૃત્વા સાવિત્રીં વ્યાહૃતિષુ પ્રવેશયિત્વા ।
અહં વૃક્ષસ્ય રેરિવ । કીર્તિઃ પૃષ્ઠં ગિરેરિવ ।
ઊર્ધ્વપવિત્રો વાજિનીવસ્વમૃતમસ્મિ ।
દ્રવિણં મે સવર્ચસં સુમેધા અમૃતોક્ષિતઃ ।
ઇતિ ત્રિશઙ્કોર્વેદાનુવચનમ્ ।
યશ્છન્દસામૃષભો વિશ્વરૂપઃ । છન્દોભ્યોધ્યમૃતાત્સંબભૂવ ।
સ મેન્દ્રો મેધયા સ્પૃણોતુ । અમૃતસ્ય દેવધારણો ભૂયાસમ્ ।
શરીરં મે વિચર્ષણમ્ । જિહ્વા મે મધુમત્તમા ।
કર્ણાભ્યાં ભૂરિ વિશ્રવમ્ । બ્રહ્મણઃ કોશોઽસિ મેધયાપિહિતઃ ।
શ્રુતં મે ગોપાય । દારેષણાયાશ્ચ વિત્તેષણાયાશ્ચ
લોકેષણાયાશ્ચ વ્યુત્થિતોઽહં ૐ ભૂઃ સંન્યસ્તં મયા
ૐ ભુવઃ સંન્યસ્તં મયા ૐ સુવઃ સંન્યસ્તં મયા
ૐ ભૂર્ભુવઃસુવઃ સંન્યસ્તં મયેતિ મન્દ્રમધ્યમતાલજ-
ધ્વનિભિર્મનસા વાચોચ્ચાર્યાભયં સર્વભૂતેભ્યો
મત્તઃ સર્વં પ્રવર્તતે સ્વહેત્યનેન જલં પ્રાશ્ય પ્રાચ્યાં દિશિ
પૂર્ણાઞ્જલિં પ્રક્ષિપ્યોંસ્વાહેતિ શિખામુત્પાઠ્ય ।
યજ્ઞોપવીતં પરમં પવિત્રં પ્રજાપતેર્યત્સહજં પુરસ્તાત્ ।
આયુષ્યમગ્ર્યં પ્રતિમુઞ્ચ શુભ્રં યજ્ઞોપવીતં બલમસ્તુ તેજઃ ।
યજ્ઞોપવીત બહિર્ન નિવસેત્ત્વમન્તઃ પ્રવિશ્ય મધ્યે હ્યજસ્રં
પરમં પવિત્રં યશો બલં જ્ઞાનવૈરાગ્યં મેધાં પ્રયચ્છેતિ
યજ્ઞોપવીતં છિત્ત્વા ઉદકાઞ્જલિના સહ ૐ ભૂઃ સમુદ્રં ગચ્છ
સ્વાહેત્યપ્સુ જુહુયાદોં ભૂઃ સંન્યસ્તં મયા ૐ ભુવઃ સંન્યસ્તં મયા
ૐ સુવઃ સંન્યસ્તં મયેતિ ત્રિરુક્ત્વા ત્રિવારમભિમન્ત્ર્ય તજ્જલં
પ્રાશ્યાચમ્ય ૐ ભૂઃ સ્વાહેત્યપ્સુ વસ્ત્રં કટિસૂત્રમપિ વિસૃજ્ય
સર્વકર્મનિર્વર્તકોઽહમિતિ સ્મૃત્વા જાતરૂપધરો ભૂત્વા

સ્વરૂપાનુસન્ધાનપૂર્વકમૂર્ધ્વબાહુરુદીચીં
ગચ્છેત્પૂર્વવદ્વિદ્વત્સંન્યાસી ચેદ્ગુરોઃ સકાશાત્પ્રણવ-
મહાવાક્યોપદેશં પ્રાપ્ય યથાસુખં વિહરન્મત્તઃ કશ્ચિન્નાન્યો
વ્યતિરિક્ત ઇતિ ફલપત્રોદકાહારઃ પર્વતવનદેવાલયેષુ
સંચરેત્સંન્યસ્યાથ દિગંબરઃ સકલસંચારકઃ
સર્વદાનન્દસ્વાનુભવૈકપૂર્ણહૃદયઃ કર્માતિદૂરલાભઃ
પ્રાણાયામપરાયણઃ ફલરસત્વક્પત્રમૂલોદકૈર્મોક્ષાર્થી
ગિરિકન્દરેષુ વિસૃજેદ્દેહં સ્મરંસ્તારકમ્ ।
વિવિદિષાસંન્યાસી ચેચ્છતપથં ગત્વાચાર્યાદિભિર્વિપ્રૈસ્તિષ્ઠ તિષ્ઠ મહાભાગ દણ્ડં વસ્ત્રં કમણ્ડલું ગૃહાણ પ્રણવ
મહાવાક્યગ્રહણાર્થં
ગુરુનિકટમાગચ્છેત્યાચાર્યૈર્દણ્ડકટિસૂત્રકૌપીનં
શાટીમેકાં કમણ્ડલું પાદાદિમસ્તકપ્રમાણમવ્રણં
સમં સૌમ્યમકાકપૃષ્ઠં સલક્ષણં વૈણવં
દણ્ડમેકમાચમનપૂર્વકં સખા મા ગોપાયૌજઃ
સખાયોઽસીન્દ્રસ્ય વજ્રોઽસિ વાર્ત્રઘ્નઃ શર્મ મે ભવ
યત્પાપં તન્નિવારયેતિ દણ્ડં પરિગ્રહેજ્જગજ્જીવનં
જીવનાધારભૂતં મા તે મા મન્ત્રયસ્વ સર્વદા
સર્વસૌમ્યેતિ પ્રણવપૂર્વકં કમણ્ડલું પરિગ્રહ્ય
કૌપીનાધારં કટિસૂત્રમોમિતિ ગુહ્યાચ્છાદકં
કૌપીનમોમિતિ શીતવાતોષ્ણત્રાણકરં દેહૈકરક્ષણમોમિતિ
કટિસૂત્રકૌપીનવસ્ત્રમાચમનપૂર્વકં યોગપટ્ટાભિષિક્તો
ભૂત્વા કૃતાર્થોઽહમિતિ મત્વા સ્વાશ્રમાચારપરો ભવેદિત્યુપનિષત્ ॥

ઇતિ ચતુર્થોપદેશઃ ॥ ૪॥

અથ હૈનં પિતામહં નારદઃ પપ્રચ્છ
ભગવન્સર્વકર્મનિવર્તકઃ સંન્યાસ ઇતિ ત્વયૈવોક્તઃ
પુનઃ સ્વાશ્રમાચારપરો ભવેદિત્યુચ્યતે ।
તતઃ પિતામહ ઉવાચ ।
શરીરસ્ય દેહિનો જાગ્રત્સ્વપ્નસુષુપ્તિતુરીયાવસ્થાઃ
સન્તિ તદધીનાઃ કર્મજ્ઞાનવૈરાગ્યપ્રવર્તકાઃ
પુરુષા જન્તવસ્તદનુકૂલાચારાઃ સન્તિ તથૈવ

ચેદ્ભગવન્સંન્યાસાઃ કતિભેદાસ્તદનુષ્ઠાનભેદાઃ
કીદૃશાસ્તત્ત્વતોઽસ્માકં વક્તુમર્હસીતિ ।
તથેત્યઙ્ગીકૃત્ય તુ પિતામહેન સંન્યાસભેદૈરાચારભેદજ઼્
કથમિતિ ચેત્તત્ત્વતસ્ત્વેક એવ સંન્યાસઃ અજ્ઞાનેનાશક્તિવશા-
ત્કર્મલોપશ્ચ ત્રૈવિધ્યમેત્ય વૈરાગ્યસંન્યાસો
જ્ઞાનવૈરાગ્યસંન્યાસઃ કર્મસંન્યાસશ્ચેતિ
ચાતુર્વિધ્યમુપાગતસ્તદ્યથેતિ દુષ્ટમદનાભાચ્ચેતિ
વિષયવૈતૃષ્ણ્યમેત્ય પ્રાક્પુણ્યકર્મવશાત્સંન્યસ્તઃ
સ વૈરાગ્યસંન્યાસી શાસ્ત્રજ્ઞાનાત્પાપપુણ્યલોકાનુભવ-
શ્રવણાત્પ્રપઞ્ચોપરતઃ ક્રોધેર્ષ્યાસૂયાહઙ્કારા-
ભિમાનાત્મકસર્વસંસારં નિર્વૃત્ય દારેષણાધનેષણા-
લોકેષણાત્મકદેહવાસનાં શાસ્ત્રવાસનાં લોકવાસનાં
ત્યક્ત્વા વમનાન્નમિવ પ્રકૃતીયં સર્વમિદં હેયં મત્વા
સાધનચતુષ્ટયસમ્પન્નો યઃ સંન્યસતિ સ એવ જ્ઞાનસંન્યાસી ।
ક્રમેણ સર્વમભ્યસ્ય સર્વમનુભૂય જ્ઞાનવૈરાગ્યાભ્યાં
સ્વરૂપાનુસન્ધાનેન દેહમાત્રાવશિષ્ટઃ સંન્યસ્ય
જાતરૂપધરો ભવતિ સ જ્ઞાનવૈરાગ્યસંન્યાસી ।
બ્રહ્મચર્યં સમાપ્ય ગૃહી ભૂત્વા વાનપ્રસ્થાશ્રમમેત્ય
વૈરાગ્યભાવેઽપ્યાશ્રમક્રમાનુસારેણ યઃ
સંન્યસ્યતિ સ કર્મસંન્યાસી ।
બ્રહ્મચર્યેણ સંન્યસ્ય સંન્યાસાજ્જાતરૂપધરો
વૈરાગ્યસંન્યાસી ।
વિદ્વત્સંન્યાસી જ્ઞાનસંન્યાસી વિવિદિષાસંન્યાસી
કર્મસંન્યાસી ।
કર્મસંન્યાસોઽપિ દ્વિવિધઃ નિમિત્તસંન્યાસોઽનિમિત્તસંન્યાસશ્ચેતિ ।
નિમિત્તસ્ત્વાતુરઃ । અનિમિત્તઃ ક્રમસંન્યાસઃ ।
આતુરઃ સર્વકર્મલોપઃ પ્રાણસ્યોત્ક્રમણકાલસંન્યાસઃ
સ નિમિત્તસંન્યાસઃ ।
દૃઢાઙ્ગો ભૂત્વા સર્વં કૃતકં નશ્વરમિતિ દેહાદિકં
સર્વં હેયં પ્રાપ્ય ।
હંસઃ શુચિષદ્વસુરન્તરિક્ષસદ્ધોતા વેદિષદતિથિર્દુરોણસત્ ।

નૃષદ્વરસદૃતસદ્વ્યોમસદબ્જા ગોજા ઋતજા અદ્રિજા ઋતં બૃહત્ ।
બ્રહ્મવ્યતિરિક્તં સર્વં નશ્વરમિતિ નિશ્ચિત્યાથો ક્રમેણ યઃ સંન્યસ્યતિ
સ સંન્યાસોઽનિમિત્તસંન્યાસઃ ।
સંન્યાસઃ ષડ્વિધો ભવતિ ।
કુટીચકો બહૂદકો હંસઃ પરમહંસઃ તુરીયાતીતોઽવધૂતશ્ચેતિ ।
કુટીચકઃ શિખાયજ્ઞોપવીતી દણ્ડકમણ્ડલુધરઃ કૌપીનકન્થાધરઃ
પિતૃમાતૃગુર્વારાધનપરઃ પિઠરખનિત્રશિક્યાદિમન્ત્રસાધનપર
એકત્રાન્નાદનપરઃ શ્વેતોર્ધ્વપુણ્ડ્રધારી ત્રિદણ્ડઃ ।
બહૂદકઃ શિખાદિકન્થાધરસ્ત્રિપુણ્ડ્રધારી કુટીચકવત્સર્વસમો
મધુકરવૃત્ત્યાષ્ટકવલાશી હંસો જટાધારી ત્રિપુણ્ડ્રોર્ધ્વપુણ્ડ્રધારી
અસંક્લૃપ્તમાધુકરાન્નાશી કૌપીનખણ્ડતુણ્ડધારી ।
પરમહંસઃ શિખાયજ્ઞોપવીતરહિતઃ પઞ્ચગૃહેશ્વેકરાત્રાન્નાદનપરઃ
કરપાત્રી એકકૌપીનધારી શાટીમેકામેકં વૈણવં દણ્ડમેકશાટીધરો
વા ભસ્મોદ્ધૂલનપરઃ સર્વત્યાગી ।
તુરીયાતીતો ગોમુખઃ ફલાહારી । અન્નાહારી ચેદ્ગૃહત્રયે દેહમાત્રાવશિષ્ટો
દિગંબરઃ કુણપવચ્છરીરવૃત્તિકઃ ।
અવધૂતસ્ત્વનિયમોઽભિશસ્તપતિતવર્જનપૂર્વકં સર્વવર્ણેષ્વજગર-
વૃત્ત્યાહારપરઃ સ્વરૂપાનુસન્ધાનપરઃ ।
આતુરો જીવતિ ચેત્ક્રમસંન્યાસઃ કર્તવ્યઃ
કુટીચકબહૂદકહંસાનાં બ્રહ્મચ-
ર્યાશ્રમાદિતુરીયાશ્રમવત્ કુટીચકાદીનાં
સંન્યાસવિધિઃ ।
પરમહંસાદિત્રયાણાં ન કટીસૂત્રં ન કૌપીનં
ન વસ્ત્રં ન કમણ્ડલુર્ન દણ્ડઃ સાર્વવર્ણૈક-
ભૈક્ષાટનપરત્વં જાતરૂપધરત્વં વિધિઃ ।
સંન્યાસકાલેઽપ્યલંબુદ્ધિપર્યન્તમધીત્ય
તદનન્તરં કટીસૂત્રં કૌપીનં દણ્ડં વસ્ત્રં
કમણ્ડલું સર્વમપ્સુ વિસૃજ્યાથ જાતરૂપધરશ્ચરેન્ન
કન્થાવેશો નાધ્યેતવ્યો ન શ્રોતવ્યમન્યત્કિઞ્ચિત્પ્રણવાદન્યં
ન તર્કં પઠેન્ન શબ્દમપિ બૃહચ્છબ્દાન્નાધ્યાપયેન્ન
મહદ્વાચોવિગ્લાપનં ગિરા પાણ્યાદિના સંભાષણં

નાન્યસ્માદ્વા વિશેષેણ ન શૂદ્રસ્ત્રીપતિતોદક્યાસંભાષણં
ન યતેર્દેવપૂજા નોત્સવદર્શનં તીર્થયાત્રાવૃત્તિઃ ।
પુનર્યતિવિશેષઃ ।
કુટીચસ્યૈકત્ર ભિક્ષા બહૂદકસ્યાસંક્લૃપ્તં
માધુકરં હંસસ્યાષ્ટગૃહેષ્વષ્ટકવલં
પરમહંસસ્ય પઞ્ચગૃહેષુ કરપાત્રં
ફલાહારો ગોમુખં તુરીયાતીતસ્યાવધૂતસ્યાજગરવૃત્તિઃ
સાર્વવર્ણિકેષુ યતિર્નૈકરાત્રં વસેન્ન કસ્યાપિ
નમેત્તુરીયાતીતાવધૂતયોર્ન જ્યેષ્ઠો યો ન સ્વરૂપજ્ઞઃ
સ જ્યેષ્ઠોઽપિ કનિષ્ઠો હસ્તાભ્યાં નદ્યુત્તરણં
ન કુર્યાન્ન વૃક્ષમારોહેન્ન યાનાદિરૂઢો ન
ક્રયવિક્રયપરો ન કિઞ્ચિદ્વિનિમયપરો ન દામ્ભિકો
નાનૃતવાદી ન યતેઃ કિંચિત્કર્તવ્યમસ્ત્યસ્તિચેત્સાંકર્યમ્ ।
તસ્માન્મનનાદૌ સંન્યાસિનામધિકારઃ ।
આતુરકુટીચકયોર્ભૂર્લોકો બહૂદકસ્ય
સ્વર્ગલોકો હંસસ્ય તપોલોકઃ પરમહંસસ્ય
સત્યલોકસ્તુરીયાતીતાવધૂતયોઃ સ્વાત્મન્યેવ
કૈવલ્યં સ્વરૂપાનુસન્ધાનેન ભ્રમરકીટન્યાયવત્ ।
યં યં વાપિ સ્મરન્ભાવં ત્યજત્યન્તે કલેવરમ્ ।
તં તમેવ સમાપ્નોતિ નાન્યથા શ્રુતિશાસનમ્ ।
તદેવં જ્ઞાત્વા સ્વરૂપાનુસન્ધાનં વિનાન્યથાચારપરો
ન ભવેત્તદાચારવશાત્તત્તલ્લોકપ્રાપ્તિર્જ્ઞાન-
વૈરાગ્યસમ્પન્નસ્ય સ્વસ્મિન્નેવ મુક્તિરિતિ ન સર્વત્રાચારપ્રસક્તિ-
સ્તદાચારઃ । જાગ્રત્સ્વપ્નસુષુપ્તેષ્વેકશરીરસ્ય જાગ્રત્કાલે
વિશ્વઃ સ્વપ્નકાલે તૈજસઃ સુષુપ્તિકાલે પ્રાજ્ઞઃ
અવસ્થાભેદાદવસ્થેશ્વરભેદઃ કાર્યભેદાત્કારણભેદસ્તાસુ
ચતુર્દશકારણાનાં બાહ્યવૃત્તયોઽતર્વૃતયસ્તેષા-
મુપાદાનકારણમ્ ।
વૃત્તયશ્ચત્વારઃ મનોબુદ્ધિરહઙ્કારશ્ચિત્તં ચેતિ ।
તત્તદ્વૃત્તિવ્યાપારભેદેન પૃથગાચારભેદઃ ।
નેત્રસ્થં જાગરિતં વિદ્યાત્કણ્ઠે સ્વપ્નં સમાવિશત્ ।

સુષુપ્તં હૃદયસ્થં તુ તુરીયં મૂર્ધ્નિ સંસ્થિતમ્ ।
તુરીયમક્ષરમિતિ જ્ઞાત્વા જાગરિતે સુષુપ્ત્યવસ્થાપન્ન
ઇવ યદ્યચ્છ્રુતં યદ્યદૃષ્ટં તત્સત્સર્વમવિજ્ઞાતમિવ
યો વસેત્તસ્ય સ્વપ્નાવસ્થાયામપિ તાદૃગવસ્થા ભવતિ ।
સ જીવન્મુક્ત ઇતિ વદન્તિ । સર્વશ્રુત્યર્થપ્રતિપાદનમપિ તસ્યૈવ
મુક્તિરિતિ । ભિક્ષુર્નૈહિકામુષ્મિકાપેક્ષઃ । યદ્યપેક્ષાસ્તિ
તદનુરૂપો ભવતિ । સ્વરૂપાનુસન્ધાનવ્યતિરિક્તાન્યશાસ્ત્રા-
ભ્યાસૈરુષ્ટ્રકુઙ્કુમભારવદ્વ્યર્થો ન યોગશાસ્ત્ર-
પ્રવૃત્તિર્ન સાઙ્ખ્યશાસ્ત્રાભ્યાસો ન મન્ત્રતન્ત્રવ્યાપારઃ ।
ઇતરશાસ્ત્રપ્રવૃત્તિર્યતેરસ્તિ ચેચ્છવાલઙ્કારવચ્ચર્મકારવ-
દતિવિદૂરકર્માચારવિદ્યાદૂરો ન પ્રણવકીર્તનપરો યદ્યત્કર્મ
કરોતિ તત્તત્ફલમનુભવતિ એરણ્ડતૈલફેનવદતઃ સર્વં પરિત્યજ્ય
તત્પ્રસક્તં મનોદણ્ડં કરપાત્રં દિગમ્બરં દૃષ્ટ્વા
પરિવ્રજેદ્ભિક્ષુઃ । બાલોન્મત્તપિશાચવન્મરણં જીવિતં વા ન
કાઙ્ક્ષેત કાલમેવ પ્રતીક્ષેત નિર્દેશભૃતકન્યાયેન પરિવ્રાડિતિ ।
તિતિક્ષાજ્ઞાનવૈરાગ્યશમાદિગુણવર્જિતઃ ।
ભિક્ષામાત્રેણ જીવિ સ્યાત્સ યતિર્યતિવૃત્તિહા ॥ ૧॥

ન દણ્ડધારણેન ન મુણ્ડનેન ન વેષેણ ન દમ્ભાચારેણ
મુક્તિઃ । જ્ઞાનદણ્ડો ધૃતો યેન એકદણ્ડી સ ઉચ્યતે ।
કાષ્ઠદણ્ડો ધૃતો યેન સર્વાશી જ્ઞાનવર્જિતઃ ।
સ યાતિ નરકાન્ઘોરાન્મહારૌરવસંજ્ઞિતાન્ ॥ ૨॥

પ્રતિષ્ઠા સૂકરીવિષ્ઠાસમા ગીતા મહર્ષિભિઃ ।
તસ્માદેનાં પરિત્યજ્ય કીટવત્પર્યટેદ્યતિઃ ॥ ૩॥

અયાચિતં યથાલાભં ભોજનાચ્છાદનં ભવેત્ ।
પરેચ્છયા ચ દિગ્વાસાઃ સ્નાનં કુર્યાત્પરેચ્છયા ॥ ૪॥

સ્વપ્નેઽપિ યો યુક્તઃ સ્યાજ્જાગ્રતીવ વિશેષતઃ ।
ઈદૃક્ચેષ્ટઃ સ્મૃતઃ શ્રેષ્ઠો વરિષ્ઠો બ્રહ્મવાદિનામ્ ॥ ૫॥

અલાભે ન વિષાદી સ્યાલ્લાભે ચૈવ ન હર્ષયેત્ ।
પ્રાણયાત્રિકમાત્રઃ સ્યાન્માત્રાસઙ્ગાદ્વિનિર્ગતઃ ॥ ૬॥

અભિપૂજિતલાભાંશ્ચ જુગુપ્સેતૈવ સર્વશઃ ।
અભિપૂજિતલાભૈસ્તુ યતિર્મુક્તોઽપિ બધ્યતે ॥ ૭॥

પ્રાણયાત્રાનિમિત્તં ચ વ્યઙ્ગારે ભુક્તવજ્જને ।
કાલે પ્રશસ્તે વર્ણાનાં ભિક્ષાર્થં પર્યટેદ્ગૃહાન્ ॥ ૮॥

પાણિપાત્રશ્ચરન્યોગી નાસકૃદ્ભૈક્ષમાચરેત્ ।
તિષ્ઠન્ભુઞ્જ્યાચ્ચરન્ભુઞ્જ્યાન્મધ્યેનાચમનં તથા ॥ ૯॥

અબ્ધિવદ્ધૃતમર્યાદા ભવન્તિ વિશાદાશયાઃ ।
નિયતિં ન વિમુઞ્ચન્તિ મહાન્તો ભાસ્કરા એવ ॥ ૧૦॥

આસ્યેન તુ યદાહારં ગોવન્મૃગયતે મુનિઃ ।
તદા સમઃ સ્યાત્સર્વેષુ સોઽમૃતત્વાય કલ્પતે ॥ ૧૧॥

અનિન્દ્યં વૈ વ્રજન્ગેહં નિન્દ્યં ગેહં તુ વર્જયેત્ ।
અનાવૃતે વિશેદ્દ્વારિ ગેહે નૈવાવૃતે વ્રજેત્ ॥ ૧૨॥

પાંસુના ચ પ્રતિચ્છન્નશૂન્યાગારપ્રતિશ્રયઃ ।
વૃક્ષમૂલનિકેતો વા ત્યક્તસર્વપ્રિયાપ્રિયઃ ॥ ૧૩॥

યત્રાસ્તમિતશાયી સ્યાન્નિરગ્નિરનિકેતનઃ ।
યથાલબ્ધોપજીવી સ્યાન્મુનિર્દાન્તો જિતેન્દ્રિયઃ ॥ ૧૪॥

નિષ્ક્રમ્ય વનમાસ્થાય જ્ઞાનયજ્ઞો જિતેન્દ્રિયઃ ।
કાલકાઙ્ક્ષી ચરન્નેવ બ્રહ્મભૂયાય કલ્પતે ॥ ૧૫॥

અભયં સર્વભૂતેભ્યો દત્ત્વા ચરતિ યો મુનિઃ ।
ન તસ્ય સર્વભૂતેભ્યો ભયમુત્પદ્યતે ક્વચિત્ ॥ ૧૬॥

નિર્માનશ્ચાનહઙ્કારો નિર્દ્વન્દ્વશ્છિન્નસંશયઃ ।
નૈવ ક્રુધ્યતિ ન દ્વેષ્ટિ નાનૃતં ભાષતે ગિરા ॥ ૧૭॥

પુણ્યાયતનચારી ચ ભૂતાનામવિહિંસકઃ ।
કાલે પ્રાપ્તે ભવદ્ભૈક્ષં કલ્પ્યતે બ્રહ્મભૂયસે ॥ ૧૮॥

વાનપ્રસ્થગૃહસ્થાભ્યાં ન સંસૃજ્યેત કર્હિચિત્ ।
અજ્ઞાતચર્યાં લિપ્સેત ન ચૈનં હર્ષ આવિશેત્ ॥ ૧૯॥

અધ્વા સૂર્યેણ નિર્દિષ્ટઃ કીટવદ્વિચરેન્મહીમ્ ।

આશીર્યુક્તાનિ કર્માણિ હિંસાયુક્તાનિ યાનિ ચ ॥ ૨૦॥

લોકસંગ્રહયુક્તાનિ નૈવ કુર્યાન્ન કારયેત્ ।
નાસચ્છાત્રેષુ સજ્જેત નોપજીવેત જીવિકામ્ ।
અતિવાદાંસ્ત્યજેત્તર્કાન્પક્ષં કઞ્ચન નાશ્રયેત્ ॥ ૨૧॥

ન શિષ્યાનનુબધ્નીત ગ્રન્થાન્નૈવાભ્યસેદ્બહૂન્ ।
ન વ્યાખ્યામુપયુઞ્જીત નારમ્ભાનારભેત્ક્વચિત્ ॥ ૨૨॥

અવ્યક્તલિઙ્ગોઽવ્યક્તાર્થો મુનિરુન્મત્તબાલવત્ ।
કવિર્મૂકવદાત્માનં તદ્દૃષ્ટ્યા દર્શયેન્નૃણામ્ ॥ ૨૩॥

ન કુર્યાન્ન વદેત્કિઞ્ચિન્ન ધ્યાયેત્સાધ્વસાધુ વા ।
આત્મારામોઽનયા વૃત્ત્યા વિચરેજ્જડવન્મુનિઃ ॥ ૨૪॥

એકશ્ચરેન્મહીમેતાં નિઃસઙ્ગઃ સંયતેન્દ્રિયઃ ।
આત્મક્રીડ આત્મરતિરાત્મવાન્સમદર્શનઃ ॥ ૨૫॥

બુધો બાલકવત્ક્રીડેત્કુશલો જડવચ્ચરેત્ ।
વદેદુન્મત્તવદ્વિદ્વાન્ ગોચર્યાં નૈગમશ્ચરેત્ ॥ ૨૬॥

ક્ષિપ્રોઽવમાનિતોઽસદ્ભિઃ પ્રલબ્ધોઽસૂયિતોઽપિ વા ।
તાડિતઃ સંનિરુદ્ધો વા વૃત્ત્યા વા પરિહાપિતઃ ॥ ૨૭॥

વિષ્ઠિતો મૂત્રિતો વાજ્ઞૈર્બહુધૈવં પ્રકમ્પિતઃ ।
શ્રેયસ્કામઃ કૃચ્છ્રગત આત્મનાત્માનમુદ્ધરેત્ ॥ ૨૮॥

સંમાનનં પરાં હાનિં યોગર્દ્ધેઃ કુરુતે યતઃ ।
જનેનાવમતો યોગી યોગસિદ્ધિં ચ વિન્દતિ ॥ ૨૯॥

તથા ચરેત વૈ યોગી સતાં ધર્મમદૂષયન્ ।
જના યથાવમન્યેરન્ગચ્છેયુર્નૈવ સઙ્ગતિમ્ ॥ ૩૦॥

જરાયુજાણ્ડજાદીનાં વાઙ્મનઃકાયકર્મભિઃ ।
યુક્તઃ કુર્વીત ન દ્રોહં સર્વસઙ્ગાંશ્ચ વર્જયેત્ ॥ ૩૧॥

કામક્રોધૌ તથા દર્પલોભમોહાદયશ્ચ યે ।
તાંસ્તુ દોષાન્પરિત્યજ્ય પરિવ્રાડ્ ભયવર્જિતઃ ॥ ૩૨॥

ભૈક્ષાશનં ચ મૌનિત્વં તપો ધ્યાનં વિશેષતઃ ।

સમ્યગ્જ્ઞાનં ચ વૈરાગ્યં ધર્મોઽયં ભિક્ષુકે મતઃ ॥ ૩૩॥

કાષાયવાસાઃ સતતં ધ્યાનયોગપરાયણઃ ।
ગ્રામાન્તે વૃક્ષમૂલે વા વસેદ્દેવાલયેઽપિ વા ॥ ૩૪॥

ભૈક્ષેણ વર્તયેન્નિત્યં નૈકાન્નાશી ભવેત્ક્વચિત્ ।
ચિત્તશુદ્ધિર્ભવેદ્યાવત્તાવન્નિત્યં ચરેત્સુધીઃ ॥ ૩૫॥

તતઃ પ્રવ્રજ્ય શુદ્ધાત્મા સંચરેદ્યત્ર કુત્રચિત્ ।
બહિરન્તશ્ચ સર્વત્ર સમ્પશ્યન્હિ જનાર્દનમ્ ॥ ૩૬॥

સર્વત્ર વિચરેન્મૌની વાયુવદ્વીતકલ્મષઃ ।
સમદુઃખસુખઃ ક્ષાન્તો હસ્તપ્રાપ્તં ચ ભક્ષયેત્ ॥ ૩૭॥

નિર્વૈરેણ સમં પશ્યન્દ્વિજગોશ્વમૃગાદિષુ ।
ભાવયન્મનસા વિષ્ણું પરમાત્માનમીશ્વરમ્ ॥ ૩૮॥

ચિન્મયં પરમાનન્દં બ્રહ્મૈવાહમિતિ સ્મરન્ ।
જ્ઞાત્વૈવં મનોદણ્ડં ધૃત્વા આશાનિવૃત્તો ભૂત્વા
આશામ્બરધરો ભૂત્વા સર્વદા મનોવાક્કાયકર્મભિઃ
સર્વસંસારમુત્સૃજ્ય પ્રપઞ્ચાવાઙ્મુખઃ
સ્વરૂપાનુસન્ધાનેન ભ્રમરકીટન્યાયેન મુક્તો
ભવતીત્યુપનિષત્ ॥

ઇતિ પઞ્ચમોપદેશઃ ॥ ૫॥

અથ નારદઃ પિતામહમુવાચ ।
ભગવન્ તદભ્યાસવશાત્ ભ્રમકીટન્યાયવત્તદભ્યાસઃ કથમિતિ ।
તમાહ પિતામહઃ ।
સત્યવાગ્જ્ઞાનવૈરાગ્યાભ્યાં વિશિષ્ટદેહાવશિષ્ટો
વસેત્ । જ્ઞાનં શરીરં વૈરાગ્યં જીવનં વિદ્ધિ
શાન્તિદાન્તી નેત્રે મનોમુખં બુદ્ધિઃ કલા
પઞ્ચવિંશતિતત્ત્વાન્યવયવ અવસ્થા
પઞ્ચમહાભૂતાનિ કર્મ ભક્તિજ્ઞાનવૈરાગ્યં શાખા
જાગ્રત્સ્વપ્નસુષુપ્તિતુરીયાશ્ચતુર્દશકરણાનિ
પઙ્કસ્તમ્ભાકારાણીતિ । એવમપિ નાવમતિપઙ્કં કર્ણધાર

ઇવ યન્તેવ ગજં સ્વબુદ્ધ્યા વશીકૃત્ય સ્વવ્યતિરિક્તં સર્વં
કૃતકં નશ્વરમિતિ મત્વા વિરક્તઃ પુરુષઃ  સર્વદા
બ્રહ્માહમિતિ વ્યવહરેન્નાન્યત્કિઞ્ચિદ્વેદિતવ્યં સ્વવ્યતિરેકેણ ।
જીવન્મુક્તો વસેત્કૃતકૃત્યો ભવતિ । ન નાહં બ્રહ્મેતિ
વ્યવહરેત્કિન્તુ બ્રહ્માહમસ્મીત્યજસ્રં જાગ્રત્સ્વપ્નસુષુપ્તિષુ ।
તુરીયાવસ્થાં પ્રાપ્ય તુરીયાતીતત્વં વ્રજેદ્દિવા જાગ્રન્નક્તં
સ્વપ્નં સુષુપ્તમર્ધરાત્રં ગતમિત્યેકાવસ્થાયાં
ચતસ્રોઽવસ્થાસ્ત્વેકૈકકરણાધીનાનાં ચતુર્દશકરણાનાં વ્યાપારશ્ચક્ષુરાદીનામ્ ।
ચક્ષુષો રૂપગ્રહણં શ્રોત્રયોઃ શબ્દગ્રહણં
જિહ્વાયા રસાસ્વાદનં ઘ્રાણસ્ય ગન્ધગ્રહણં
વચસો વાગ્વ્યાપારઃ પાણેરાદાનં પાદયોઃ સંચારઃ
પાયોરુત્સર્ગ ઉપસ્થસ્યાનન્દગ્રહણં ત્વચઃ સ્પર્શગ્રહણમ્ ।
તદધીના ચ વિષયગ્રહણબુદ્ધિઃ બુદ્ધ્યા બુદ્ધ્યતિ
ચિત્તેન ચેતયત્યહઙ્કારેણાહઙ્કરોતિ । વિસૃજ્ય જીવ
એતાન્દેહાભિમાનેન જીવો ભવતિ । ગૃહાભિમાનેન ગૃહસ્થ
ઇવ શરીરે જીવઃ સંચરતિ । પ્રાગ્દલે પુણ્યાવૃત્તિરાગ્નેયાં
નિદ્રાલસ્યૌ દક્ષિણાયાં ક્રૌર્યબુદ્ધિર્નૈરૃત્યાં પાપબુદ્ધિઃ
પશ્ચિમે ક્રીડારતિર્વાયવ્યાં ગમને બુદ્ધિરુત્તરે શાન્તિરીશાન્યે
જ્ઞાનં કર્ણિકાયાં વૈરાગ્યં કેસરેષ્વાત્મચિન્તા ઇત્યેવં
વક્ત્રં જ્ઞાત્વા જીવદવસ્થાં પ્રથમં જાગ્રદ્દ્વિતીયં
સ્વપ્નં તૃતીયં સુષુપ્તં ચતુર્થં તુરીયં ચતુર્ભિર્વિરહિતં
તુરીયાતીતમ્ । વિશ્વતૈજસપ્રાજ્ઞતટસ્થભેદૈરેક એવ એકો દેવઃ
સાક્ષી નિર્ગુણશ્ચ તદ્બ્રહ્માહમિતિ વ્યાહરેત્ ।
નો ચેજ્જાગ્રદવસ્થાયાં જાગ્રદાદિચતસ્રોઽવસ્થાઃ સ્વપ્ને
સ્વપ્નાદિચતસ્રોઽવસ્થાઃ સુષુપ્તે સુષુપ્ત્યાદિચતસ્રોઽવસ્થાઃ
તુરીયે તુરીયાદિચતસ્રોઽવસ્થાઃ નત્વેવં તુરીયાતીતસ્ય નિર્ગુણસ્ય ।
સ્થૂલસૂક્ષ્મકારણરૂપૈર્વિશ્વતૈજસપ્રાજ્ઞેશ્વરૈઃ
સર્વાવસ્થાસુ સાક્ષી ત્વેક એવાવતિષ્ઠતે । ઉત તટસ્થો દ્રષ્ટા
તટસ્થો ન દ્રષ્ટા દ્રષ્ટૃત્વાન્ન દ્રષ્ટૈવ કર્તૃત્વભોક્તૃત્વ
અહઙ્કારાદિભિઃ સ્પૃષ્ટો જીવઃ જીવેતરો ન સ્પૃષ્ટઃ । જીવોઽપિ
ન સ્પૃષ્ટ ઇતિ ચેન્ન । જીવાભિમાનેન ક્ષેત્રાભિમાનઃ ।

શરીરાભિમાનેન જીવત્વમ્ । જીવત્વં ઘટાકાશમહાકાશવ-
દ્વ્યવધાનેઽસ્તિ । વ્યવધાનવશાદેવ હંસઃ સોઽહમિતિ
મન્ત્રેણોચ્છ્વાસનિઃશ્વાસવ્યપદેશેનાનુસન્ધાનં કરોતિ ।
એવં વિજ્ઞાય શરીરાભિમાનં ત્યજેન્ન શરીરાભિમાની ભવતિ ।
સ એવ બ્રહ્મેત્યુચ્યતે।
ત્યક્તસઙ્ગો જિતક્રોધો લઘ્વાહારો જિતેન્દ્રિયઃ ।
પિધાય બુદ્ધ્યા દ્વારાણિ મનો ધ્યાને નિવેશયેત્ ॥ ૧॥

શૂન્યેષ્વેવાવકાશેષુ ગુહાસુ ચ વનેષુ ચ ।
નિત્યયુક્તઃ સદા યોગી ધ્યાનં સમ્યગુપક્રમેત્ ॥ ૨॥

આતિથ્યશ્રાદ્ધયજ્ઞેષુ દેવયાત્રોત્સવેષુ ચ ।
મહાજનેષુ સિદ્ધ્યર્થી ન ગચ્છેદ્યોગવિત્ક્વચિત્ ॥ ૩॥

યથૈનમવમન્યન્તે જનાઃ પરિભવન્તિ ચ ।
તથા યુક્તશ્ચેદ્યોગી સતાં વર્ત્મ ન દૂષયેત્ ॥ ૪॥

વાગ્દણ્ડઃ કર્મદણ્ડશ્ચ મનોદણ્ડશ્ચ તે ત્રયઃ ।
યસ્યૈતે નિયતા દણ્ડાઃ સ ત્રિદણ્ડી મહાયતિઃ ॥ ૫॥

વિધૂમે ચ પ્રશાન્તાગ્નૌ યસ્તુ માધુકરીં ચરેત્ ।
ગૃહે ચ વિપ્રમુખ્યાનાં યતિઃ સર્વોત્તમઃ સ્મૃતઃ ॥ ૬॥

દણ્ડભિક્ષાં ચ યઃ કુર્યાત્સ્વધર્મે વ્યસનં વિના ।
યસ્તિષ્ઠતિ ન વૈરાગ્યં યાતિ નીચયતિર્હિ સઃ ॥ ૭॥

યસ્મિન્ગૃહે વિશેષેણ લભેદ્ભિક્ષાં ચ વાસનાત્ ।
તત્ર નો યાતિ યો ભૂયઃ સ યતિર્નેતરઃ સ્મૃતઃ ॥ ૮॥

યઃ શરીરેન્દ્રિયાદિભ્યો વિહીનં સર્વસાક્ષિણમ્ ।
પારમાર્થિક વિજ્ઞાનં સુખાત્માનં સ્વયંપ્રભમ્ ॥ ૯॥

પરતત્ત્વં વિજાનાતિ સોઽતિવર્ણાશ્રમી ભવેત્ ।
વર્ણાશ્રમાદયો દેહે માયયા પરિકલ્પિતાઃ ॥ ૧૦॥

નાત્મનો બોધરૂપસ્ય મમ તે સન્તિ સર્વદા ।
ઇતિ યો વેદ વેદાન્તૈઃ સોઽતિવર્ણાશ્રમી ભવેત્ ॥ ૧૧॥

યસ્ય વર્ણાશ્રમાચારો ગલિતઃ સ્વાત્મદર્શનાત્ ।
સ વર્ણાનાશ્રમાન્સર્વાનતીત્ય સ્વાત્મનિ સ્થિતઃ ॥ ૧૨॥

યોઽતીત્ય સ્વાશ્રમાન્વર્ણાનાત્મન્યેવ સ્થિતઃ પુમાન્ ।
સોઽતિવર્ણાશ્રમી પ્રોક્તઃ સર્વવેદાર્થવેદિભિઃ ॥ ૧૩॥

તસ્માદન્યગતા વર્ણા આશ્રમા અપિ નારદ ।
આત્મન્યારોપિતાઃ સર્વે ભ્રાન્ત્યા તેનાત્મવેદિના ॥ ૧૪॥

ન વિધિર્ન નિષેધશ્ચ વર્જ્યાવર્જ્ય કલ્પના ।
બ્રહ્મવિજ્ઞાનિનામસ્તિ તથા નાન્યચ્ચ નારદ ॥ ૧૫॥

વિરજ્ય સર્વભૂતેભ્ય આવિરિઞ્ચિપદાદપિ ।
ઘૃણાં વિપાટ્ય સર્વસ્મિન્પુત્રમિત્રાદિકેષ્વપિ ॥ ૧૬॥

શ્રદ્ધાલુર્મુક્તિમાર્ગેષુ વેદાન્તજ્ઞાનલિપ્સયા ।
ઉપાયનકરો ભૂત્વા ગુરું બ્રહ્મવિદં વ્રજેત્ ॥ ૧૭॥

સેવાભિઃ પરિતોષ્યૈનં ચિરકાલં સમાહિતઃ ।
સદા વેદાન્તવાક્યાર્થં શ્રુણુયાત્સુસમાહિતઃ ॥ ૧૮॥

નિર્મમો નિરહઙ્કારઃ સર્વસઙ્ગવિવર્જિતઃ ।
સદા શાન્ત્યાદિયુક્તઃ સન્નાત્મન્વાત્માનમીક્ષતે ॥ ૧૯॥

સંસારદોષદૃષ્ટ્યૈવ વિરક્તિર્જાયતે સદા ।
વિરક્તસ્ય તુ સંસારાત્સંન્યાસઃ સ્યાન્ન સંશયઃ ॥ ૨૦॥

મુમુક્ષુઃ પરહંસાખ્યઃ સાક્ષાન્મોક્ષૈકસાધનમ્ ।
અભ્યસેદ્બ્રહ્મવિજ્ઞાનં વેદાન્તશ્રવણાદિના ॥ ૨૧॥

બ્રહ્મવિજ્ઞાનલાભાય પરહંસ સમાહ્વયઃ ।
શાન્તિદાન્ત્યાદિભિઃ સર્વૈઃ સાધનૈઃ સહિતો ભવેત્ ॥ ૨૨॥

વેદાન્તાભ્યાસનિરતઃ શાન્તો દાન્તો જિતેન્દ્રિયઃ ।
નિર્ભયો નિર્મમો નિત્યો નિર્દ્વન્દ્વો નિષ્પરિગ્રહઃ ॥ ૨૩॥

જીર્ણકૌપીનવાસાઃ સ્યાન્મુણ્ડી નગ્નોઽથવા ભવેત્ ।
પ્રાજ્ઞો વેદાન્તવિદ્યોગી નિર્મમો નિરહઙ્કૃતિઃ ॥ ૨૪॥

મિત્રાદિષુ સમો મૈત્રઃ સમસ્તેષ્વેવ જન્તુષુ ।

એકો જ્ઞાની પ્રશાન્તાત્મા સ સન્તરતિ નેતરઃ ॥ ૨૫॥

ગુરૂણાં ચ હિતે યુક્તસ્તત્ર સંવત્સરં વસેત્ ।
નિયમેષ્વપ્રમાત્તસ્તુ યમેષુ ચ સદાભવેત્ ॥ ૨૬॥

પ્રાપ્ય ચાન્તે તતશ્ચૈવ જ્ઞાનયોગમનુત્તમમ્ ।
અવિરોધેન ધર્મસ્ય સંચરેત્પૃથિવીમિમામ્ ॥ ૨૭॥

તતઃ સંવત્સરસ્યાન્તે જ્ઞાનયોગમનુત્તમમ્ ।
આશ્રમત્રયમુત્સૃજ્ય પ્રાપ્તશ્ચ પરમાશ્રમમ્ ॥ ૨૮॥

અનુજ્ઞાપ્ય ગુરૂંશ્ચૈવ ચરેદ્ધિ પૃથિવીમિમામ્ ।
ત્યક્તસઙ્ગો જિતક્રોધો લઘ્વાહારો જિતેન્દ્રિયઃ ॥ ૨૯॥

દ્વાવિમૌ ન વિરજ્યેતે વિપરીતેન કર્મણા ।
નિરારમ્ભો ગૃહસ્થશ્ચ કાર્યવાંશ્ચૈવ ભિક્ષુકઃ ॥ ૩૦॥

માદ્યતિ પ્રમદાં દૃષ્ટ્વા સુરાં પીત્વા ચ માદ્યતિ ।
તસ્માદ્દૃષ્ટિવિષં નારીં દૂરતઃ પરિવર્જયેત્ ॥ ૩૧॥

સંભાષણં સહ સ્ત્રીભિરાલાપઃ પ્રેક્ષણં તથા ।
નૃત્તં ગાનં સહાસં ચ પરિવાદાંશ્ચ વર્જયેત્ ॥ ૩૨॥

ન સ્નાનં ન જપઃ પૂજા ન હોમો નૈવ સાધનમ્ ।
નાગ્નિકાર્યાદિકાર્યં ચ નૈતસ્યાસ્તીહ નારદ ॥ ૩૩॥

નાર્ચનં પિતૃકાર્યં ચ તીર્થયાત્રા વ્રતાનિ ચ ।
ધર્માધર્માદિકં નાસ્તિ ન વિધિર્લૌકિકી ક્રિયા ॥ ૩૪॥

સન્ત્યજેત્સર્વકર્માણિ લોકાચારં ચ સર્વશઃ ।
કૃમીકીટપતઙ્ગાશ્ચ તથા યોગી વનસ્પતીન્ ॥ ૩૫॥

ન નાશયેદ્બુધો જીવન્પરમાર્થમતિર્યતિઃ ।
નિત્યમન્તર્મુખઃ સ્વચ્છઃ પ્રશાન્તાત્મા સ્વપૂર્ણધીઃ ॥ ૩૬॥

અન્તઃસઙ્ગપરિત્યાગી લોકે વિહર નારદ ।
નારાજકે જનપદે ચરત્યેકચરો મુનિઃ ॥ ૩૭॥

નિઃસ્તુતિર્નિર્નમસ્કારો નિઃસ્વધાકાર એવ ચ ।
ચલાચલનિકેતશ્ચ  યતિર્યાદૃચ્છિકો ભવેદિત્યુપનિષત્ ॥

ઇતિ ષષ્ઠોપદેશઃ ॥ ૬॥

અથ યતેર્નિયમઃ કથમિતિ પૃષ્ટં નારદં પિતામહઃ
પુરસ્કૃત્ય વિરક્તઃ સન્યો વર્ષાસુ ધ્રુવશીલોઽષ્ટૌ
માસ્યેકાકી ચરન્નેકત્ર નિવસેદ્ભિક્ષુર્ભયાત્સારઙ્ગવદેકત્ર
ન તિષ્ઠેસ્વગમનનિરોધગ્રહણં ન કુર્યાદ્ધસ્તાભ્યાં
નદ્યુત્તરણં ન કુર્યાન્ન વૃક્ષારોહણમપિ ન
દેવોત્સવદર્શનં કુર્યાન્નૈકત્રાશી ન બાહ્યદેવાર્ચનં
કુર્યાત્સ્વવ્યતિરિક્તં સર્વં ત્યક્ત્વા મધુકરવૃત્ત્યાહારમહારન્કૃશો
ભૂત્વા મેદોવૃદ્ધિમકુર્વન્નાજ્યં રુધિરમિવ ત્યજેદેકત્રાન્નં
પલલમિવ ગન્ધલેપનમશુદ્ધિલેપનમૈવ ક્ષારમન્ત્યજમિવ
વસ્ત્રમુચ્છિષ્ટપાત્રમિવાભ્યઙ્ગં સ્ત્રીસઙ્ગમિવ
મિત્રાહ્લાદકં મૂત્રમિવ સ્પૃહાં ગોમાંસમિવ જ્ઞાતચરદેશં
ચણ્ડાલવાટિકામિવ સ્ત્રિયમહિમિવ સુવર્ણં કાલકૂટમિવ
સભાસ્થલં સ્મશાનસ્થલમિવ રાજધાનીં કુમ્ભીપાકમિવ
શવપિણ્ડવદેકત્રાન્નં ન દેહાન્તરદર્શનં પ્રપઞ્ચવૃત્તિં
પરિત્યજ્ય સ્વદેશમુત્સૃજ્ય જ્ઞાતચરદેશં વિહાય
વિસ્મૃતપદાર્થં પુનઃ પ્રાપ્તહર્ષ ઇવ સ્વમાનન્દમનુસ્મર-
ન્સ્વશરીરાભિમાનદેશવિસ્મરણં મત્વા શવમિવ હેયમુપગમ્ય
કારાગૃહવિનિર્મુક્તચોરવત્પુત્રાપ્તબન્ધુભવસ્થલં
વિહાય દૂરતો વસેત્ ।
અયત્નેન પ્રાપ્તમાહરન્બ્રહ્મપ્રણવધ્યાનાનુસન્ધાનપરો
ભૂત્વા સર્વકર્મનિર્મુક્તઃ કામક્રોધલોભમોહમદ-
માત્સર્યાદિકં દગ્ધ્વા ત્રિગુણાતીતઃ ષડૂર્મિરહિતઃ
ષડ્ભાવવિકારશૂન્યઃ । સત્યવાક્છુચિરદ્રોહી ગ્રામ
એકરાત્રં પત્તને પઞ્ચરાત્રં ક્ષેત્રે પઞ્ચરાત્રં તીર્થે
પઞ્ચરાત્રમનિકેતઃ સ્થિરમતિર્નાનૃતવાદી ગિરિકન્દરેષુ
વસેદેક એવ દ્વૌ વા ચરેત્ ગ્રામં ત્રિભિર્નગરં ચતુર્ભિ-
ર્ગ્રામમિત્યેકશ્ચરેત્ । ભિક્ષુશ્ચતુર્દશકરણાનાં
ન તત્રાવકાશં દદ્યાદવિચ્છિન્નજ્ઞાનાદ્વૈરાગ્યસમ્પત્તિ-
મનુભૂય મત્તો ન કશ્ચિન્નાન્યો વ્યતિરિક્ત ઇત્યાત્મન્યાલોચ્ય

સર્વતઃ સ્વરૂપમેવ પશ્યઞ્જીવન્મુક્તિમવાપ્ય પ્રારબ્ધ-
પ્રતિભાસનાશપર્યન્તં ચતુર્વિધં સ્વરૂપં જ્ઞાત્વા
દેહપતનપર્યન્તં સ્વરૂપાનુસન્ધાનેન વસેત્ ।
ત્રિષવણસ્નાનં કુટીચકસ્ય બહૂદકસ્ય દ્વિવારં
હંસસ્યૈકવારં પરમહંસસ્ય માનસસ્નાનં
તુરીયાતીતસ્ય ભસ્મસ્નાનમવધૂતસ્ય વાયવ્યસ્નાનં
ઊર્ધ્વપુણ્ડ્રં કુટીચકસ્ય ત્રિપુણ્ડ્રં બહૂદકસ્ય
ઊર્ધ્વપુણ્ડ્રં ત્રિપુણ્ડ્રં હંસસ્ય ભસ્મોદ્ધૂલનં
પરમહંસસ્ય તુરીયાતીતસ્ય તિલકપુણ્ડ્રમવધૂતસ્ય ન
કિઞ્ચિત્ । તુરીયાતીતાવધૂતયોઃ ઋતુક્ષૌરં કુટીચકસ્ય
ઋતુદ્વયક્ષૌરં બહૂદકસ્ય ન ક્ષૌરં હંસસ્ય
પરમહંસસ્ય ચ ન ક્ષૌરમ્ । અસ્તિચેદયનક્ષૌરમ્ ।
તુરીયાતીતાવધૂતયોઃ ન ક્ષૌરમ્ । કુટીચકસ્યૈકાન્નં
માધુકરં બહૂદકસ્ય હંસપરમહંસયોઃ કરપાત્રં
તુરીયાતીતસ્ય ગોમુખં અવધૂતસ્યાજગરવૃત્તિઃ । શાટિદ્વયં
કુટીચકસ્ય બહૂદકસ્યૈકશાટી હંસસ્ય ખણ્ડં
દિગંબરં પરમહંસસ્ય એકકૌપીનં વા તુરીયાતીતાવધૂતયો-
ર્જાતરૂપધરત્વં હંસપરમહંસયોરજિનં ન ત્વન્યેષામ્ ।
કુટીચકબહૂદકયોર્દેવાર્ચનં હંસપરમહંસયો-
ર્માનસાર્ચનં તુરીયાતીતાવધૂતયોઃ સોહંભાવના ।
કુટીચકબહૂદકયોર્મન્ત્રજપાધિકારો હંસપરમહંસયો-
ર્ધ્યાનાધિકારસ્તુરીયાતીતાવધૂતયોર્ન ત્વન્યાધિકાર-
સ્તુરીયાતીતાવધૂતયોર્મહાવાક્યોપદેશાધિકારઃ
પરમહંસસ્યાપિ । કુટીચકબહૂદકહંસાનાં
નાન્યસ્યોપદેશાધિકારઃ। કુટીચકબહૂદકયોર્માનુષપ્રણવઃ
હંસપરમહંસયોરાન્તરપ્રણવઃ તુરીયાતીતાવધૂતયોર્બ્રહ્મપ્રણવઃ ।
કુટીચકબહૂદકયોઃ શ્રવણં હંસપરમહંસયોર્મનનં
તુરીયાતીતાવધૂતયોર્નિદિધ્યાસઃ । સર્વેષામાત્મનુસન્ધાનં
વિધિરિત્યેવ મુમુક્ષુઃ સર્વદા સંસારતારકં તારકમનુસ્મર-
ઞ્જીવન્મુક્તો વસેદધિકારવિશેષેણ કૈવલ્યપ્રાપ્ત્યુપાય-
મન્વિષ્યેદ્યતિરિત્યુપનિષત્ ॥

ઇતિ સપ્તમોપદેશઃ ॥ ૭॥

અથ હૈનં ભગવન્તં પરમેષ્ઠિનં નારદઃ
પપ્રચ્છ સંસારતારકં પ્રસન્નો બ્રૂહીતિ ।
તથેતિ પરમેષ્ઠી વક્તુમુચક્રમે ઓમિતિ બ્રહ્મેતિ
વ્યષ્ટિસમષ્ટિપ્રકારેણ । કા વ્યષ્ટિઃ કા
સમષ્ટિઃ સંહારપ્રણવઃ સૃષ્ટિપ્રણવ-
શ્ચાન્તર્બહિશ્ચોભયાત્મકત્વાત્ત્રિવિધો
બ્રહ્મપ્રણવઃ । અન્તઃપ્રણવો વ્યાવહારિકપ્રણવઃ ।
બાહ્યપ્રણવ આર્ષપ્રણવઃ । ઉભયાત્મકો
વિરાટ્પ્રણવઃ । સંહારપ્રણવો બ્રહ્મપ્રણવ
અર્ધમાત્રાપ્રણવઃ । ઓમિતિબ્રહ્મ । ઓમિત્યેકાક્ષર-
મન્તઃપ્રણવં વિદ્ધિ । સચાષ્ટધા ભિદ્યતે ।
અકારોકારમકારાર્ધમાત્રાનાદબિન્દુકલાશક્તિશ્ચેતિ ।
તત્ર ચત્વાર અકારશ્ચાયુતાવયવાન્વિત ઉકારઃ
સહસ્રાવયવાન્વિતો મકારઃ શતાવયવોપેતોઽર્ધમાત્રા-
પ્રણવોઽનન્તાવયવાકારઃ । સગુણો વિરાટ્પ્રણવઃ સંહારો
નિર્ગુણપ્રણવ ઉભયાત્મકોત્પત્તિપ્રણવો યથાપ્લુતો
વિરાટ્પ્લુતઃ પ્લુતસંહારો વિરાટ્પ્રણવઃ ષોડશમાત્રાત્મકઃ
ષટ્ત્રિંશત્તત્ત્વાતીતઃ । ષોડશમાત્રાત્મકત્વં
કથમિત્યુચ્યતે । અકારઃ પ્રથમોકારો દ્વિતીયા મકાર-
સ્તૃતીયાર્ધમાત્રા ચતુર્થી નાદઃ પઞ્ચમી બિન્દુઃ
ષષ્ઠી કલા સપ્તમી કલાતીતાષ્ટમી શાન્તિર્નવમી
શાન્ત્યતીતા દશમી ઉન્મન્યેકાદશી મનોન્મની દ્વાદશી
પુરી ત્રયોદશી મધ્યમા ચતુર્દશી પશ્યન્તી પઞ્ચદશી
પરા । ષોડશી પુનશ્ચતુઃષષ્ટિમાત્રા પ્રકૃતિ-
પુરુષદ્વૈવિધ્યમાસાદ્યાષ્ટાવિંશત્યુત્તરભેદમાત્રા-
સ્વરૂપમાસાદ્ય સગુણનિર્ગુણત્વમુપેત્યૈકોઽપિ બ્રહ્મપ્રણવઃ
સર્વાધારઃ પરંજ્યોતિરેષ સર્વેશ્વરો વિભુઃ । સર્વદેવમયઃ
સર્વપ્રપઞ્ચાધારગર્ભિતઃ ॥ ૧॥

સર્વાક્ષરમયઃ કાલઃ સર્વાગમમયઃ શિવઃ ।

સર્વશ્રુત્યુત્તમો મૃગ્યઃ સકલોપનિષન્મયઃ ॥ ૨॥

ભૂતં ભવ્યં ભવિષ્યદ્યત્ત્રિકાલોદિતમવ્યયમ્ ।
તદપ્યોઙ્કારમેવાયં વિદ્ધિ મોક્ષપ્રદાયકમ્ ॥ ૩॥

તમેવાત્માનમિત્યેતદ્બ્રહ્મશબ્દેન વર્ણિતમ્ ।
તદેકમમૃતમજરમનુભૂય તથોમિતિ ॥ ૪॥

સશરીરં સમારોપ્ય તન્મયત્વં તથોમિતિ ।
ત્રિશરીરં તમાત્માનં પરંબ્રહ્મ વિનિશ્ચિનુ ॥ ૫॥

પરંબ્રહ્માનુસન્દધ્યાદ્વિશ્વાદીનાં ક્રમઃ ક્રમાત્ ।
સ્થૂલત્વાત્સ્થૂલભુક્ત્વાચ્ચ સૂક્ષ્મત્વાત્સૂક્ષ્મભુક્ પરમ્ ॥ ૬॥

ઐકત્વાનન્દભોગાચ્ચ સોઽયમાત્મા ચતુર્વિધઃ ।
ચતુષ્પાજ્જાગરિતઃ સ્થૂલઃ સ્થૂલપ્રજ્ઞો હિ વિશ્વભુક્ ॥ ૭॥

એકોનવિંશતિમુખઃ સાષ્ટાઙ્ગઃ સર્વગઃ પ્રભુ ।
સ્થૂલભુક્ ચતુરાત્માથ વિશ્વો વૈશ્વાનરઃ પુમાન્ ॥ ૮॥

વિશ્વજિત્પ્રથમઃ પાદઃ સ્વપ્નસ્થાનગતઃ પ્રભુઃ ।
સૂક્ષ્મપ્રજ્ઞઃ સ્વતોઽષ્ટાઙ્ગ એકો નાન્યઃ પરંતપ ॥ ૯॥

સૂક્ષ્મભુક્ ચતુરાત્માથ તૈજસો ભૂતરાડયમ્ ।
હિરણ્યગર્ભઃ સ્થૂલોઽન્તર્દ્વિતીયઃ પાદ ઉચ્યતે ॥ ૧૦॥

કામં કામયતે યાવદ્યત્ર સુપ્તો ન કઞ્ચન ।
સ્વપ્નં પશ્યતિ નૈવાત્ર તત્સુષુપ્તમપિ સ્ફુટમ્ ॥ ૧૧॥

એકીભૂતઃ સુષુપ્તસ્થઃ પ્રજ્ઞાનઘનવાન્સુખી ।
નિત્યાનન્દમયોઽપ્યાત્મા સર્વજીવાન્તરસ્થિતઃ ॥ ૧૨॥

તથાપ્યાનન્દભુક્ ચેતોમુખઃ સર્વગતોઽવ્યયઃ ।
ચતુરાત્મેશ્વરઃ પ્રાજ્ઞસ્તૃતીયઃ પાદસંજ્ઞિતઃ ॥ ૧૩॥

એષ સર્વેશ્વરશ્ચૈષ સર્વજ્ઞઃ સૂક્ષ્મભાવનઃ ।
એષોઽન્તર્યામ્યેષ યોનિઃ સર્વસ્ય પ્રભવાપ્યયૌ ॥ ૧૪॥

ભૂતાનાં ત્રયમપ્યેતત્સર્વોપરમબાધકમ્ ।
તત્સુષુપ્તં હિ યત્સ્વપ્નં માયામાત્રં પ્રકીર્તિતમ્ ॥ ૧૫॥

ચતુર્થશ્ચતુરાત્માપિ સચ્ચિદેકરસો હ્યયમ્ ।
તુરીયાવસિતત્ત્વાચ્ચ એકૈકત્વનુસારતઃ ॥ ૧૬॥

જ્ઞાતાનુજ્ઞાત્રનનુજ્ઞાતૃવિકલ્પજ્ઞાનસાધનમ્ ।
વિકલ્પત્રયમત્રાપિ સુષુપ્તં સ્વપ્નમાન્તરમ્ ॥ ૧૭॥

માયામાત્રં વિદિત્વૈવં સચ્ચિદેકરસો હ્યયમ્ ।
વિભક્તો હ્યયમાદેશો ન સ્થૂલપ્રજ્ઞમન્વહમ્ ॥ ૧૮॥

ન સૂક્ષ્મપ્રજ્ઞમત્યન્તં ન પ્રજ્ઞં ન ક્વચિન્મુને ।
નૈવાપ્રજ્ઞં નોભયતઃપ્રજ્ઞં ન પ્રજ્ઞમાન્તરમ્ ॥ ૧૯॥

નાપ્રજ્ઞમપિ ન પ્રજ્ઞાઘનં ચાદૃષ્ટમેવ ચ ।
તદલક્ષણમગ્રાહ્યં યદ્વ્યવહાર્યમચિન્ત્ય-
મવ્યપદેશ્યમેકાત્મપ્રત્યયસારં પ્રપઞ્ચોપશમં
શિવં શાન્તમદ્વૈતં ચતુર્થં મન્યન્તે સ બ્રહ્મ
પ્રણવઃ સ વિજ્ઞેયો નાપરસ્તુરીયઃ સર્વત્ર
ભાનુવન્મુમુક્ષૂણામાધારઃ સ્વયંજ્યોતિર્બ્રહ્માકાશઃ
સર્વદા વિરાજતે પરંબ્રહ્મત્વાદિત્યુપનિષત્ ॥

ઇતિ અષ્ટમોપદેશઃ ॥ ૮॥

અથ બ્રહ્મસ્વરૂપં કથમિતિ નારદઃ પપ્રચ્છ ।
તં હોવાચ પિતામહઃ કિં બ્રહ્મસ્વરૂપમિતિ ।
અન્યોસાવન્યોહમસ્મીતિ યે વિદુસ્તે પશવો ન સ્વભાવ-
પશવસ્તમેવં જ્ઞાત્વા વિદ્વાન્મૃત્યુમુખાત્પ્રમુચ્યતે
નાન્યઃ પન્થા વિદ્યતેઽયનાય ।
કાલઃ સ્વભાવો નિયતિર્યદૃચ્છા
ભૂતાનિ યોનિઃ પુરુષ ઇતિ ચિન્ત્યમ્ ।
સંયોગ એષાં નત્વાત્મભાવા-
દાત્મા હ્યનીશઃ સુખદુઃખહેતોઃ ॥ ૧॥

તે ધ્યાનયોગાનુગતા અપશ્યન્
દેવાત્મશક્તિં સ્વગુણૈર્નિગૂઢામ્ ।
યઃ કારણાનિ નિખિલાનિ તાનિ

કાલાત્મયુક્તાન્યધિતિષ્ઠત્યેકઃ ॥ ૨॥

તમેકસ્મિંસ્ત્રિવૃતં ષોડશાન્તં
શતાર્ધારં વિંશપ્રતિત્યરાભિઃ ।
અષ્ટકૈઃ ષડ્ભિર્વિશ્વરૂપૈકપાશં
ત્રિમાર્ગભેદં દ્વિનિમિત્તૈકમોહમ્ ॥ ૩॥

પઞ્ચસ્રોતોમ્બું પઞ્ચયોન્યુગ્રવક્ત્રાં
પઞ્ચપ્રાણોર્મિં પઞ્ચબુદ્ધ્યાદિમૂલામ્ ।
પઞ્ચાવર્તાં પઞ્ચદુઃખૌઘવેગાં
પઞ્ચશદ્ભેદાં પઞ્ચપર્વામધીમઃ ॥ ૪॥

સર્વાજીવે સર્વસંસ્થે બૃહન્તે
તસ્મિન્હંસો ભ્રામ્યતે બ્રહ્મચક્રે ।
પૃથગાત્માનં પ્રેરિતારં ચ મત્વા
જુષ્ટસ્તતસ્તેનામૃતત્વમેતિ ॥ ૫॥

ઉદ્ગીથમેતત્પરમં તુ બ્રહ્મ
તસ્મિંસ્ત્રયં સ્વપ્રતિષ્ઠાક્ષરં ચ ।
અત્રાન્તરં વેદવિદો વિદિત્વા
લીનાઃ પરે બ્રહ્મણિ તત્પરાયણાઃ ॥ ૬॥

સંયુક્તમેતત્ક્ષરમક્ષરં ચ
વ્યક્તાવ્યક્તં ભરતે વિશ્વમીશઃ ।
અનીશશ્ચાત્મા બધ્યતે ભોક્તૃભાવા-
જ્જ્ઞાત્વા દેવં મુચ્યતે સર્વપાશૈઃ ॥ ૭॥

જ્ઞાજ્ઞૌ દ્વાવજાવીશનીશાવજા
હ્યેકા ભોક્તૃભોગાર્થયુક્તા ।
અનન્તશ્ચાત્મા વિશ્વરૂપો હ્યકર્તા
ત્રયં યદા વિન્દતે બ્રહ્મમેતત્ ॥ ૮॥

ક્ષરં પ્રધાનમમૃતાક્ષરં હરઃ
ક્ષરાત્માનાવીશતે દેવ એકઃ ।
તસ્યાભિધ્યાનાદ્યોજનાત્તત્ત્વભાવા-
દ્ભૂયશ્ચાન્તે વિશ્વમાયાનિવૃત્તિઃ ॥ ૯॥

જ્ઞાત્વા દેવં મુચ્યતે સર્વપાશૈઃ
ક્ષીણૈઃ ક્લેશૈર્જન્મમૃત્યુપ્રહાણિઃ ।
તસ્યાભિધ્યાનાત્તૃતયં દેહભેદે
વિશ્વૈશ્વર્યં કેવલ આત્મકામઃ ॥ ૧૦॥

એતજ્જ્ઞેયં નિત્યમેવાત્મસંસ્થં
નાતઃ પરં વેદિતવ્યં હિ કિઞ્ચિત્ ।
ભોક્તા ભોગ્યં પ્રેરિતારં ચ મત્વા
સર્વં પ્રોક્તં ત્રિવિધં બ્રહ્મમેતત્ ॥ ૧૧॥

આત્મવિદ્યા તપોમૂલં તદ્બ્રહ્મોપનિષત્પરમ્ ।
ય એવં વિદિત્વા સ્વરૂપમેવાનુચિન્તયં-
સ્તત્ર કો મોહઃ કઃ શોક એકત્વમનુપશ્યતઃ ॥ ૧૨॥

તસ્માવિરાડ્ભૂતં ભવ્યં
ભવિષ્યદ્ભવત્યનશ્વરસ્વરૂપમ્ ।
અણોરણીયાન્મહતો મહીયા-
નાત્માસ્ય જન્તોર્નિહિતો ગુહાયામ્ ।
તમક્રતું પશ્યતિ વીતશોકો
ધાતુઃપ્રસાદાન્મહિમાનમીશમ્ ॥ ૧૩॥

અપાણિપાદો જવનો ગ્રહીતા
પશ્યત્યચક્ષુઃ સ શ્રુણોત્યકર્ણઃ ।
સ વેત્તિ વેદ્યં ન ચ તસ્યાસ્તિ વેત્તા
તમાહુરગ્ર્યં પુરુષં મહાન્તમ્ ॥ ૧૪॥

અશરીરં શરીરેષ્વનવસ્થેશ્વવસ્થિતમ્ ।
મહાન્તં વિભુમાત્માનં મત્વા ધીરો ન શોચતિ ॥ ૧૫॥

સર્વસ્ય ધાતારમચિન્ત્યશક્તિં
સર્વાગમાન્તાર્થવિશેષવેદ્યમ્ ।
પરાત્પરં પરમં વેદિતવ્યં
સર્વાવસાને સકૃદ્વેદિતવ્યમ્ ॥ ૧૬॥

કવિં પુરાણં પુરુષોત્તમોત્તમં

સર્વેશ્વરં સર્વદેવૈરુપાસ્યમ્ ।
અનાદિ મધ્યાન્તમનન્તમવ્યયં
શિવાચ્યુતામ્ભોરુહગર્ભભૂધરમ્ ॥ ૧૭॥

સ્વેનાવૃતં સર્વમિદં પ્રપઞ્ચં
પઞ્ચાત્મકં પઞ્ચસુ વર્તમાનમ્ ।
પઞ્ચીકૃતાનન્તભવપ્રપઞ્ચં
પઞ્ચીકૃતસ્વાવયવૈરસંવૃતમ્ ।
પરાત્પરં યન્મહતો મહાન્તં
સ્વરૂપતેજોમયશાશ્વતં શિવમ્ ॥ ૧૭॥

નાવિરતો દુશ્ચરિતાન્નાશાન્તો નાસમાહિતઃ ।
નાશાન્તમનસો વાપિ પ્રજ્ઞાનેનૈનમાપ્નુયાત્ ॥ ૧૮॥

નાન્તઃપ્રજ્ઞં ન બહિઃપ્રજ્ઞં ન સ્થૂલં નાસ્થૂલં
ન જ્ઞાનં નાજ્ઞાનં નોભયતઃપ્રજ્ઞમગ્રાહ્ય-
મવ્યવહાર્યં સ્વાન્તઃસ્થિતઃ સ્વયમેવેતિ ય એવં વેદ
સ મુક્તો ભવતિ સ મુક્તો ભવતીત્યાહ ભગવાન્પિતામહઃ ।
સ્વસ્વરૂપજ્ઞઃ પરિવ્રાટ્ પરિવ્રાડેકાકી ચરતિ
ભયત્રસ્તસારઙ્ગવત્તિષ્ઠતિ । ગમનવિરોધં ન કરોતિ ।
સ્વશરીરવ્યતિરિક્તં સર્વં ત્યક્ત્વા ષ્ટ્પદવૃત્ત્યા સ્થિત્વા
સ્વરૂપાનુસન્ધાનં કુર્વન્સર્વમનન્યબુદ્ધ્યા
સ્વસ્મિન્નેવ મુક્તો ભવતિ । સ પરિવ્રાટ્ સર્વક્રિયાકારકનિવર્તકો
ગુરુશિષ્યશાસ્ત્રાદિવિનિર્મુક્તઃ સર્વસંસારં વિસૃજ્ય
ચામોહિતઃ પરિવ્રાટ્ કથં નિર્ધનિકઃ સુખી ધનવા-
ઞ્જ્ઞાનાજ્ઞાનોભયાતીતઃ સુખદુઃખાતીતઃ
સ્વયંજ્યોતિપ્રકાશઃ સર્વવેદ્યઃ સર્વજ્ઞઃ સર્વસિદ્ધિદઃ
સર્વેશ્વરઃ સોઽહમિતિ । તદ્વિષ્ણોઃ પરમં પદં યત્ર
ગત્વા ન નિવર્તન્તે યોગિનઃ । સૂર્યો ન તત્ર ભાતિ
ન શશાઙ્કોઽપિ ન સ પુનરાવર્તતે ન સ પુનરાવર્તતે
તત્કૈવલ્યમિત્યુપનિષત્ ॥

ઇતિ નવમોપદેશઃ ॥ ૯॥

ॐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવા ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ।
સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ।
સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ॐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ઇતિ નારદપરિવ્રાજકોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi (sunderh@hotmail.com)

.. Narad-Parivrajaka Upanishad ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*